# ASTADHYAYI

**Editor : Medhā Michika, AVG, Anaikatti**



Published by:

Arsha Avinash Foundation
104 Third Street, Tatabad, Coimbatore 641012, India
Phone: + 91 9487373635
E mail: arshaavinash@gmail.com
www.arshaavinash.in

ओम्

श्रीपाणिनिमहामुनिविरचितः

# अष्टाध्यायीसूत्रपाठः

## aṣṭādhyāyīsūtrapāṭhaḥ
## of pāṇini

अनुवृत्तिवार्तिकपरिभाषासहितः

With anuvṛtti, vārtika, and paribhāṣā


सम्पादिका

**ब्रह्मचारिणी मेधा मिचिका**

आर्षविद्यागुरुकुलम्, आनैक्कट्टी



विक्रमसंवत् २०७०



Editress

Brahmacārinī Medhā Michika

ओम्

श्रीगणेशाय नमः

श्रीगुरुभ्यो नमः

वन्दे परमकारुण्यान् येषां वृद्धिगुणादयः ।
अस्मिन् ग्रन्थेऽनुवर्तेरन् शब्दार्थसुखसिद्धये ॥

अथ श्रीपाणिनिमहामुनिविरचितः

# अष्टाध्यायीसूत्रपाठः

येनाक्षरसमाम्नायमधिगम्य महेश्वरात् ।
कृत्स्नं व्याकरणं प्रोक्तं तस्मै पाणिनये नमः ॥

वाक्यकारं वररुचिं भाष्यकारं पतञ्जलिम् ।
पाणिनिं सूत्रकारं च प्रणतोऽस्मि मुनित्रयम् ॥

अथ शब्दानुशासनम्

1. अइउण् 2. ऋऌक् 3. एओङ् 4. ऐऔच्
5. हयवरट् 6. लण् 7. ञमङणनम् 8. झभञ्
9. घढधष् 10. जबगडदश् 11. खफछठथचटतव्
12. कपय् 13. शषसर् 14. हल्

इति माहेश्वरसूत्राणि ॥

# अथ प्रथमोऽध्यायः

## अथ प्रथमः पादः

### (वृद्ध्यादिसंज्ञा-प्रकरणम्)

1.1.1 वृद्धिरादैच् वृद्धिः 3

1.1.2 अदेङ् गुणः गुणः 3

1.1.3 इको गुण-वृद्धी 6

1.1.4 न धातुलोप आर्धधातुके न 6

1.1.5 क्क्ङिति च

1.1.6 दीधी-वेवीटाम्

1.1.7 हलोऽनन्तराः संयोगः

1.1.8 मुखनासिकावचनोऽनुनासिकः

1.1.9 तुल्यास्य-प्रयत्नं सवर्णम् सवर्णम् 10

(वा०) ऋलृवर्णयोर्मिथः सावर्ण्यं वाच्यम्

1.1.10 नाज्झलौ

1.1.11 ईदूदेद् द्विवचनं प्रगृह्यम्

ईदूदेद् 12; प्रगृह्यम् 19

1.1.12 अदसो मात्

1.1.13 शे

1.1.14 निपात एकाजनाङ् निपातः 15

1.1.15 ओत् 16

1.1.16 सम्बुद्धौ शाकल्यस्येतावनार्षे

शाकल्यस्य, इतौ, अनार्षे 18

1.1.17 उञः 18

1.1.18 ऊँ

1.1.19 ईदूतौ च सप्तम्यर्थे

1.1.20 दा-धा घ्वदाप्

1.1.21 आद्यन्तवदेकस्मिन्

1.1.22 तरप्-तमपौ घः

1.1.23 बहु-गण-वतु-डति सङ्ख्या

सङ्ख्या 25

1.1.24 ष्-णान्ता षट् षट् 25

1.1.25 डति च

1.1.26 क्त-क्तवतू निष्ठा

### (सर्वनामसंज्ञा-प्रकरणम्)

1.1.27 सर्वादीनि सर्वनामानि

सर्वादीनि 32; सर्वनामानि 36

1.1.28 विभाषा दिक्समासे बहुव्रीहौ

1.1.29 न बहुव्रीहौ न 31

1.1.30 तृतीयासमासे

1.1.31 द्वन्द्वे च द्वन्द्वे 32

1.1.32 विभाषा जसि 36

1.1.33 प्रथम-चरम-तयाल्पार्ध-कतिपय-नेमाश्च

(वा०) तीयस्य ङित्सु वा

1.1.34 पूर्व-परावर-दक्षिणोत्तरापराधराणि व्यवस्थायामसंज्ञायाम्

1.1.35 स्वमज्ञाति-धनाख्यायाम्

1.1.36 अन्तरं बहिर्योगोपसंव्यानयोः

### (अव्यय-संज्ञाप्रकरणम्)

1.1.37 स्वरादि-निपातमव्ययम् अव्ययम् 41

1.1.38 तद्धितश्चासर्वविभक्तिः

1.1.39 कृन्मेजन्तः

1.1.40 क्त्वा-तोसुन्-कसुनः

1.1.41 अव्ययीभावश्च

### (सर्वनामस्थानादिसंज्ञा-प्रकरणम्)

1.1.42 शि सर्वनामस्थानम् सर्वनामस्थानम् 43

1.1.43 सुडनपुंसकस्य

1.1.44 न वेति विभाषा

1.1.45 इग्यणः संप्रसारणम्

1.1.46 आद्यन्तौ ट-कितौ

### (परिभाषा-सूत्राणि)

1.1.47 मिदचोऽन्त्यात् परः

1.1.48 एच इग्घ्रस्वादेशे

1.1.49 षष्ठी स्थानेयोगा षष्ठी 55; स्थाने 51

1.1.50 स्थानेऽन्तरतमः

1.1.51 उरण् रपरः

1.1.52 अलोऽन्त्यस्य अलः 55; अन्त्यस्य 53

1.1.53 ङिच्च

1.1.54 आदेः परस्य

1.1.55 अनेकाल्-शित् सर्वस्य

### (स्थानिवद्भाव-सूत्राणि)

1.1.56 स्थानिवदादेशोऽनल्विधौ
स्थानिवत् 58; आदेशः 59

1.1.57 अचः परस्मिन् पूर्वविधौ
अचः 59; परस्मिन् पूर्वविधौ 58

1.1.58 न पदान्त-द्विर्वचन-वरे-यलोप-स्वर-सवर्णानुस्वार-दीर्घ-जश्-चर्-विधिषु
न 59

1.1.59 द्विर्वचनेऽचि

### (लोपादिसंज्ञा-प्रकरणम्)

1.1.60 अदर्शनं लोपः अदर्शनम् 61

1.1.61 प्रत्ययस्य लुक्-श्लु-लुपः

1.1.62 प्रत्ययलोपे प्रत्ययलक्षणम् 63

1.1.63 न लुमताऽङ्गस्य

1.1.64 अचोऽन्त्यादि टि

1.1.65 अलोऽन्त्यात् पूर्व उपधा

1.1.66 तस्मिन्निति निर्दिष्टे पूर्वस्य निर्दिष्टे 67

1.1.67 तस्मादित्युत्तरस्य

### (ग्रहण-सूत्राणि)

1.1.68 स्वं रूपं शब्दस्याशब्दसंज्ञा
स्वं रूपम् 72

1.1.69 अणुदित् सवर्णस्य चाप्रत्ययः
सवर्णस्य 70

1.1.70 तपरस्तत्कालस्य

1.1.71 आदिरन्त्येन सहेता

1.1.72 येन विधिस्तदन्तस्य

(प०) यस्मिन्विधिस्तदादावल्ग्रहणे

### (वृद्धसंज्ञा-प्रकरणम्)

1.1.73 वृद्धिर्यस्याचामादिस्तद् वृद्धम् वृद्धम् 75

(वा०) वा नामधेयस्य वृद्धसंज्ञा वक्तव्या

1.1.74 त्यदादीनि च

1.1.75 एङ् प्राचां देशे

॥ इति अष्टाध्यायीसूत्रपाठे प्रथमाध्यायस्य प्रथमः पादः ॥

# अथ प्रथमाध्यायस्य द्वितीयः पादः

**(ङित्-प्रकरणम्)**

1.2.1 गाङ्-कुटादिभ्योऽञ्णिन् ङित् ङित् 4

1.2.2 विज इट् इट् 3

1.2.3 विभाषोर्णोः

1.2.4 सार्वधातुकमपित् अपित् 5

**(कित्-प्रकरणम्)**

1.2.5 असंयोगाल्लिट् कित् लिट् 6; कित् 26

1.2.6 इन्धि-भवतिभ्यां च

1.2.7 मृड-मृद-गुध-कुष-क्लिश-वद-वसः त्त्वा त्त्वा 8

1.2.8 रुद-विद-मुष-ग्रहि-स्वपि-प्रच्छः संश्च सन् 10

1.2.9 इको झल् इकः 11; झल् 13

1.2.10 हलन्ताच्च हलन्तात् 11

1.2.11 लिङ्-सिचावात्मनेपदेषु लिङ्सिचौ 13; आत्मनेपदेषु 17

1.2.12 उश्च

1.2.13 वा गमः

1.2.14 हनः सिच् सिच् 17

1.2.15 यमो गन्धने यमः 16

1.2.16 विभाषोपयमने

1.2.17 स्था-घ्वोरिच्च

1.2.18 न त्त्वा सेट् न 22; सेट् 26

1.2.19 निष्ठा शीङ्-स्विदि-मिदि-क्ष्विदि-धृषः निष्ठा 22

1.2.20 मृषस्तितिक्षायाम्

1.2.21 उदुपधाद्भावादिकर्मणोरन्यतरस्याम्

1.2.22 पूङः त्त्वा च त्त्वा 26

1.2.23 नोपधात् थ-फान्ताद् वा वा 26

1.2.24 वञ्चि-लुञ्च्यृतश्च

1.2.25 तृषि-मृषि-कृशेः काश्यपस्य

1.2.26 रलो व्युपधाद्धलादेः संश्च

**(स्वर-प्रकरणम्)**

1.2.27 ऊकालोऽज्झ्रस्व-दीर्घ-प्लुतः अच् 31; ह्रस्वदीर्घप्लुतः 28

1.2.28 अचश्च

1.2.29 उच्चैरुदात्तः

1.2.30 नीचैरनुदात्तः

1.2.31 समाहारः स्वरितः

1.2.32 तस्यादित उदात्तमर्धह्रस्वम्

**(एकश्रुति-प्रकरणम्)**

1.2.33 एकश्रुति दूरात् सम्बुद्धौ एकश्रुति 39

1.2.34 यज्ञकर्मण्यजप-न्यूङ्ख-सामसु यज्ञकर्मणि 35

1.2.35 उच्चैस्तरां वा वषट्कारः

1.2.36 विभाषा छन्दसि

1.2.37 न सुब्रह्मण्यायां स्वरितस्य तूदात्तः सुब्रह्मण्यायाम्, स्वरितस्य 38

1.2.38 देव-ब्रह्मणोरनुदात्तः

1.2.39 स्वरितात् संहितायामनुदात्तानाम् संहितायाम्, अनुदात्तानाम् 40

1.2.40 उदात्त-स्वरितपरस्य सन्नतरः

**(अपृक्तादिसंज्ञा-प्रकरणम्)**

1.2.41 अपृक्त एकाल् प्रत्ययः

1.2.42 तत्पुरुषः समानाधिकरणः कर्मधारयः

1.2.43 प्रथमानिर्दिष्टं समास उपसर्जनम्
समासे, उपसर्जनम् 44

1.2.44 एकविभक्ति चापूर्वनिपाते

1.2.45 अर्थवदधातुरप्रत्ययः प्रातिपदिकम्
प्रातिपदिकम् 46

1.2.46 कृत्-तद्धित-समासाश्च

1.2.47 ह्रस्वो नपुंसके प्रातिपदिकस्य
ह्रस्वः, प्रातिपदिकस्य 48

1.2.48 गो-स्त्रियोरुपसर्जनस्य
स्त्री, उपसर्जनस्य 49

1.2.49 लुक् तद्धितलुकि तद्धितलुकि 50

1.2.50 इद् गोण्याः

(सङ्ख्यातिदेश-प्रकरणम्)

1.2.51 लुपि युक्तवद् व्यक्तिवचने 52

1.2.52 विशेषणानां चाजातेः

1.2.53 तदशिष्यं संज्ञाप्रमाणत्वात्
तद् अशिष्यम् 57

1.2.54 लुब् योगाप्रख्यानात्

1.2.55 योगप्रमाणे च तदभावेऽदर्शनं स्यात्

1.2.56 प्रधानप्रत्ययार्थवचनमर्थस्यान्य-
प्रमाणत्वात् अर्थस्यान्यप्रमाणत्वात् 57

1.2.57 कालोपसर्जने च तुल्यम्

1.2.58 जात्याख्यायामेकस्मिन् बहुवचन-
मन्यतरस्याम् एकस्मिन् 59;
बहुवचनम् 60; अन्यतरस्याम् 62

1.2.59 अस्मदो द्वयोश्च द्वयोः 61

1.2.60 फल्गुनी-प्रोष्ठपदानां च नक्षत्रे नक्षत्रे 62

1.2.61 छन्दसि पुनर्वस्वोरेकवचनम्
छन्दसि, एकवचनम् 62

1.2.62 विशाखयोश्च

1.2.63 तिष्य-पुनर्वस्वोर्नक्षत्र-द्वन्द्वे बहुवचनस्य
द्विवचनं नित्यम्

(एकशेष-प्रकरणम्)

1.2.64 सरूपाणामेकशेष एकविभक्तौ
एकशेषः 73

(वा०) विरूपाणामपि समानार्थानाम्

1.2.65 वृद्धो यूना तल्लक्षणश्चेदेव विशेषः
वृद्धः, यूना 66; तल्लक्षणश्चेदेव विशेषः 69

1.2.66 स्त्री पुंवच्च

1.2.67 पुमान् स्त्रिया

1.2.68 भ्रातृ-पुत्रौ स्वसृ-दुहितृभ्याम्

1.2.69 नपुंसकमनपुंसकेनैकवच्चास्यान्यतरस्याम्
अन्यतरस्याम् 71

1.2.70 पिता मात्रा

1.2.71 श्वशुरः श्वश्र्वा

1.2.72 त्यदादीनि सर्वैर्नित्यम्

(वा०) त्यदादीनां मिथः सहोक्तौ यत्परं
तच्छिष्यते

(वा०) पूर्वशेषोऽपि दृश्यते

(वा०) त्यदादितः शेषे पुंनपुंसकतः लिङ्गवचनानि

1.2.73 ग्राम्यपशुसंघेष्वतरुणेषु स्त्री

॥ इति अष्टाध्यायीसूत्रपाठे प्रथमाध्यायस्य द्वितीयः पादः ॥

# अथ प्रथमाध्यायस्य तृतीयः पादः

(संज्ञा-प्रकरणम्)

1.3.1 भूवादयो धातवः — धातवः 13
1.3.2 उपदेशेऽजनुनासिक इत् — उपदेशे, इत् 8
1.3.3 हलन्त्यम् — 4
1.3.4 न विभक्तौ तु-स्-माः
1.3.5 आदिर्ञि-टु-डवः — आदिः 8
1.3.6 षः प्रत्ययस्य — प्रत्ययस्य 8
1.3.7 चु-टू
1.3.8 ल-श-क्वतद्धिते
1.3.9 तस्य लोपः
1.3.10 यथासङ्ख्यमनुदेशः समानाम्
1.3.11 स्वरितेनाधिकारः

(आत्मनेपद-प्रकरणम्)

1.3.12 अनुदात्त-ङित आत्मनेपदम् — आत्मनेपदम् 77
1.3.13 भाव-कर्मणोः
1.3.14 कर्तरि कर्मव्यतिहारे — कर्तरि 93; कर्मव्यतिहारे 16
1.3.15 न गति-हिंसार्थेभ्यः — न 16
1.3.16 इतरेतरान्योऽन्योपपदाच्च
1.3.17 नेर्विशः
1.3.18 परि-व्यवेभ्यः क्रियः
1.3.19 वि-पराभ्यां जेः
1.3.20 आङो दोऽनास्यविहरणे — आङः 21
1.3.21 क्रीडोऽनु-सं-परिभ्यश्च
1.3.22 समव-प्र-विभ्यः स्थः — स्थः 26
1.3.23 प्रकाशन-स्थेयाख्ययोश्च
1.3.24 उदोऽनूर्ध्वकर्मणि
1.3.25 उपान् मन्त्रकरणे — उपात् 26
1.3.26 अकर्मकाच्च — अकर्मकात् 29
1.3.27 उद्-विभ्यां तपः
1.3.28 आङो यम-हनः
1.3.29 समो गम्यृच्छिभ्याम्
1.3.30 नि-समुप-विभ्यो ह्वः — ह्वः 31
(वा०) उपसर्गादस्यत्यूह्योर्वेति वाच्यम्
1.3.31 स्पर्धायामाङः
1.3.32 गन्धनावक्षेपण-सेवन-साहसिक्य-प्रति-यत्न-प्रकथनोपयोगेषु कृञः — कृञः 35
1.3.33 अधेः प्रसहने
1.3.34 वेः शब्दकर्मणः — वेः 35
1.3.35 अकर्मकाच्च
1.3.36 सम्माननोत्सञ्जनाचार्यकरण-ज्ञान-भृति-विगणन-व्ययेषु नियः — नियः 37
1.3.37 कर्तृस्थे चाशरीरे कर्मणि
1.3.38 वृत्ति-सर्ग-तायनेषु क्रमः — वृत्तिसर्गतायनेषु 39; क्रमः 43
1.3.39 उप-पराभ्याम्
1.3.40 आङ उद्गमने
1.3.41 वेः पादविहरणे
1.3.42 प्रोपाभ्यां समर्थाभ्याम्
1.3.43 अनुपसर्गाद् वा
1.3.44 अपह्नवे ज्ञः — ज्ञः 46
1.3.45 अकर्मकाच्च
1.3.46 संप्रतिभ्यामनाध्याने
1.3.47 भासनोपसम्भाषा-ज्ञान-यत्न-विमत्युप-मन्त्रणेषु वदः — वदः 50

1.3.48 व्यक्तवाचां समुच्चारणे 50
1.3.49 अनोरकर्मकात्
1.3.50 विभाषा विप्रलापे
1.3.51 अवाद् ग्रः ग्रः 52
1.3.52 समः प्रतिज्ञाने
1.3.53 उदश्चरः सकर्मकात् चरः 54
1.3.54 समस्तृतीयायुक्तात् 55
1.3.55 दाणश्च सा चेच्चतुर्थ्यर्थे
(वा०) अशिष्ट-व्यवहारे तृतीया चतुर्थ्यर्थे
1.3.56 उपाद्यमः स्वकरणे
1.3.57 ज्ञा-श्रु-स्मृ-दृशां सनः सनः 59
1.3.58 नानोर्ज्ञः न 59
1.3.59 प्रत्याङ्भ्यां श्रुवः
1.3.60 शदेः शितः शितः 61
1.3.61 म्रियतेर्लुङ्-लिङोश्च
1.3.62 पूर्ववत् सनः
1.3.63 आम्प्रत्ययवत् कृञोऽनुप्रयोगस्य
1.3.64 प्रोपाभ्यां युजेरयज्ञपात्रेषु
1.3.65 समः क्ष्णुवः
1.3.66 भुजोऽनवने
1.3.67 णेरणौ यत्कर्म णौ चेत्स कर्ता-ऽनाध्याने णे 71
1.3.68 भी-स्म्योर्हेतुभये
1.3.69 गृधि-वञ्च्योः प्रलम्भने प्रलम्भने 70
1.3.70 लियः संमानन-शालिनीकरणयोश्च
1.3.71 मिथ्योपपदात् कृञोऽभ्यासे
1.3.72 स्वरित-ञितः कर्त्रभिप्राये क्रियाफले कर्त्रभिप्राये क्रियाफले 77
1.3.73 अपाद् वदः
1.3.74 णिचश्च
1.3.75 समुदाङ्भ्यो यमोऽग्रन्थे
1.3.76 अनुपसर्गाज् ज्ञः
1.3.77 विभाषोपपदेन प्रतीयमाने

**(परस्मैपद-प्रकरणम्)**

1.3.78 शेषात् कर्तरि परस्मैपदम् कर्तरि परस्मैपदम् 93
1.3.79 अनु-पराभ्यां कृञः
1.3.80 अभि-प्रत्यतिभ्यः क्षिपः
1.3.81 प्राद् वहः
1.3.82 परेर्मृषः
1.3.83 व्याङ्-परिभ्यो रमः रमः 85
1.3.84 उपाच्च उपात् 85
1.3.85 विभाषाऽकर्मकात्
1.3.86 बुध-युध-नश-जनेङ्-प्रु-द्रु-स्रुभ्यो णेः णेः 89
1.3.87 निगरण-चलनार्थेभ्यश्च
1.3.88 अणावकर्मकाच्चित्तवत्कर्तृकात्
1.3.89 न पा-दम्याङ्यमाङ्यस-परिमुह-रुचि-नृति-वद-वसः
1.3.90 वा क्यषः वा 93
1.3.91 द्युद्भ्यो लुङि
1.3.92 वृद्भ्यः स्य-सनोः स्यसनोः 93
1.3.93 लुटि च क्लृपः

॥ इति अष्टाध्यायीसूत्रपाठे प्रथमाध्यायस्य तृतीयः पादः ॥

# अथ प्रथमाध्यायस्य चतुर्थः पादः

(एकसंज्ञाधिकारः)

1.4.1 आ कडारादेका संज्ञा 2.2.38

1.4.2 विप्रतिषेधे परं कार्यम्

(नद्यादिसंज्ञा-प्रकरणम्)

1.4.3 यू स्त्र्याख्यौ नदी 6

(वा०) प्रथमलिङ्गग्रहणं च

1.4.4 नेयङुवङ्स्थानावस्त्री 6

1.4.5 वाऽऽमि वा 6

1.4.6 ङिति ह्रस्वश्च ह्रस्वः 7

1.4.7 शेषो घ्यसखि घि 9

1.4.8 पतिः समास एव पतिः 9

1.4.9 षष्ठीयुक्तश्छन्दसि वा

1.4.10 ह्रस्वं लघु ह्रस्वम् 11

1.4.11 संयोगे गुरु गुरु 12

1.4.12 दीर्घं च

1.4.13 यस्मात् प्रत्ययविधिस्तदादि प्रत्यये-ऽङ्गम्

(पदादिसंज्ञा-प्रकरणम्)

1.4.14 सुप्-तिङन्तं पदम् पदम् 17

1.4.15 नः क्ये

1.4.16 सिति च

1.4.17 स्वादिष्वसर्वनामस्थाने 18

1.4.18 यचि भम् भम् 19

1.4.19 त-सौ मत्वर्थे

1.4.20 अयस्मयादीनि च्छन्दसि

1.4.21 बहुषु बहुवचनम्

1.4.22 द्व्येकयोर्द्विवचनैकवचने

(कारकसंज्ञा-प्रकरणम्)

1.4.23 कारके 55

1.4.24 ध्रुवमपायेऽपादानम् अपादानम् 31

1.4.25 भी-त्रार्थानां भयहेतुः

1.4.26 पराजेरसोढः

1.4.27 वारणार्थानामीप्सितः

1.4.28 अन्तर्धौ येनादर्शनमिच्छति

1.4.29 आख्यातोपयोगे

1.4.30 जनिकर्तुः प्रकृतिः कर्तुः 31

1.4.31 भुवः प्रभवः

1.4.32 कर्मणा यमभिप्रैति स संप्रदानम् संप्रदानम् 41

(वा०) क्रियया यमभिप्रैति सोऽपि संप्रदानम्

1.4.33 रुच्यर्थानां प्रीयमाणः

1.4.34 श्लाघ-ह्नुङ्-स्था-शपां ज्ञीप्स्यमानः

1.4.35 धारेरुत्तमर्णः

1.4.36 स्पृहेरीप्सितः

1.4.37 क्रुध-द्रुहेर्ष्यासूयार्थानां यं प्रति कोपः यम्, प्रति कोपः 38

1.4.38 क्रुध-द्रुहोरुपसृष्टयोः कर्म

1.4.39 राधीक्ष्योर्यस्य विप्रश्नः

1.4.40 प्रत्याङ्भ्यां श्रुवः पूर्वस्य कर्ता पूर्वस्य कर्ता 41

1.4.41 अनु-प्रति-गृणश्च

1.4.42 साधकतमं करणम् 44

1.4.43 दिवः कर्म च

1.4.44 परिक्रयणे संप्रदानमन्यतरस्याम्

1.4.45 आधारोऽधिकरणम् आधारः 48

1.4.46 अधि-शीङ्-स्थासां कर्म कर्म 48

1.4.47 अभि-नि-विशश्च

1.4.48 उपान्वध्याङ्-वसः

(वा०) वसेरश्यर्थस्य प्रतिषेधो वक्तव्यः

1.4.49 कर्तुरीप्सिततमं कर्म कर्म 53

1.4.50 तथायुक्तं चानीप्सितम्

1.4.51 अकथितं च

(वा०) अकर्मकधातुभिर्योगे देशः कालो भावो गन्तव्योऽध्वा च कर्मसंज्ञक इति वाच्यम्

1.4.52 गति-बुद्धि-प्रत्यवसानार्थ-शब्दकर्मा-कर्मकाणामणि कर्ता स णौ

अणि कर्ता स णौ 53

(वा०) गत्यर्थेषु नीवह्योः प्रतिषेधो वक्तव्यः

(वा०) आदि-खाद्योः प्रतिषेधो वक्तव्यः

1.4.53 हृ-क्रोरन्यतरस्याम्

(वा०) अभिवादिदृशोरात्मनेपदे वेति वाच्यम्

1.4.54 स्वतन्त्रः कर्ता कर्ता 55

1.4.55 तत्प्रयोजको हेतुश्च

## (निपातसंज्ञा-प्रकरणम्)

1.4.56 प्राग्रीश्वरान्निपाताः 98

1.4.57 चादयोऽसत्त्वे असत्त्वे 58

(वा०) उपसर्गविभक्तिस्वरप्रतिरूपकाश्च

1.4.58 प्रादयः 60

1.4.59 उपसर्गाः क्रियायोगे क्रियायोगे 79

(वा०) दुरः षत्वणत्वयोरुपसर्गत्वप्रतिषेधो वक्तव्यः

## (गतिसंज्ञा-प्रकरणम्)

1.4.60 गतिश्च गतिः 79

1.4.61 ऊर्यादि-च्वि-डाचश्च

1.4.62 अनुकरणं चानितिपरम्

1.4.63 आदरानादरयोः सदसती

1.4.64 भूषणेऽलम्

1.4.65 अन्तरपरिग्रहे

(वा०) अन्तश्शब्दस्याङ्किविधिणत्वेषूपसर्गत्वं वाच्यम्

1.4.66 कणे-मनसी श्रद्धाप्रतीघाते

1.4.67 पुरोऽव्ययम् अव्ययम् 69

1.4.68 अस्तं च

1.4.69 अच्छ गत्यर्थ-वदेषु

1.4.70 अदोऽनुपदेशे

1.4.71 तिरोऽन्तर्धौ 72

1.4.72 विभाषा कृञि विभाषा 76; कृञि 79

1.4.73 उपाजेऽन्वाजे

1.4.74 साक्षात्प्रभृतीनि च

1.4.75 अनत्याधान उरसि-मनसी

अनत्याधाने 76

1.4.76 मध्ये पदे निवचने च

1.4.77 नित्यं हस्ते पाणावुपयमने

1.4.78 प्राध्वं बन्धने

1.4.79 जीविकोपनिषदावौपम्ये

1.4.80 ते प्राग्धातोः ते, धातोः 82; प्राक् 81

1.4.81 छन्दसि परेऽपि छन्दसि 82

1.4.82 व्यवहिताश्च

(कर्मप्रवचनीयसंज्ञा-प्रकरणम्)

1.4.83 कर्मप्रवचनीयाः 98

1.4.84 अनुर्लक्षणे अनुः 86

1.4.85 तृतीयार्थे

1.4.86 हीने 87

1.4.87 उपोऽधिके च

1.4.88 अप-परी वर्जने

1.4.89 आङ् मर्यादावचने

1.4.90 लक्षणेत्थम्भूताख्यान-भाग-वीप्सासु प्रति-पर्यनवः ल..सु 91

1.4.91 अभिरभागे

1.4.92 प्रतिः प्रतिनिधि-प्रतिदानयोः

1.4.93 अधि-परी अनर्थकौ

1.4.94 सुः पूजायाम् पूजायाम् 95

1.4.95 अतिरतिक्रमणे च

1.4.96 अपिः पदार्थसम्भावनान्ववसर्ग-गर्हा-समुच्चयेषु

1.4.97 अधिरीश्वरे अधिः 98

1.4.98 विभाषा कृञि

(लादेश-प्रकरणम्)

1.4.99 लः परस्मैपदम् लः 100

1.4.100 तङानावात्मनेपदम्

1.4.101 तिङस्त्रीणि त्रीणि प्रथम-मध्यमोत्तमाः तिङस्त्रीणि त्रीणि 104

1.4.102 तान्येकवचन-द्विवचन-बहुवचना-न्येकशः एक..शः 103

1.4.103 सुपः 104

1.4.104 विभक्तिश्च

1.4.105 युष्मद्युपपदे समानाधिकरणे स्थानिन्यपि मध्यमः युष्मदि, मध्यमः 106; उप..न्यपि 107

1.4.106 प्रहासे च मन्योपपदे मन्यतेरुत्तम एकवच्च

1.4.107 अस्मद्युत्तमः

1.4.108 शेषे प्रथमः

1.4.109 परः सन्निकर्षः संहिता

1.4.110 विरामोऽवसानम्

॥ इति अष्टाध्यायीसूत्रपाठे प्रथमाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे प्रथमोऽध्यायः ॥

# अथ द्वितीयोऽध्यायः

## अथ प्रथमः पादः

**(समास-प्रकरणम्)**

2.1.1 समर्थः पदविधिः

2.1.2 सुबामन्त्रिते पराङ्गवत् स्वरे सुप् 2.2.29

2.1.3 प्राक् कडारात् समासः समासः 2.2.38

2.1.4 सह सुपा 2.2.22

(वा०) इवेन समासे विभक्त्यलोपश्च

**(अव्ययीभावसमास-प्रकरणम्)**

2.1.5 अव्ययीभावः 21

2.1.6 अव्ययं विभक्ति-समीप-समृद्धि-व्यृद्ध्य-र्थाभावात्ययासम्प्रति-शब्दप्रादुर्भाव-पश्चाद्-यथाऽऽनुपूर्व्य-यौगपद्य-सादृश्य-सम्पत्ति-साकल्यान्तवचनेषु अव्ययम् 8

2.1.7 यथाऽसादृश्ये

2.1.8 यावदवधारणे

2.1.9 सुप् प्रतिना मात्रार्थे

2.1.10 अक्ष-शलाका-सङ्ख्याः परिणा

2.1.11 विभाषा 2.2.29

2.1.12 अप-परि-बहिरञ्चवः पञ्चम्या पञ्चम्या 13

2.1.13 आङ् मर्यादाऽभिविध्योः

2.1.14 लक्षणेनाभि-प्रती आभिमुख्ये ल..न 16

2.1.15 अनुर्यत्समया अनुः 16

2.1.16 यस्य चायामः

2.1.17 तिष्ठद्गु-प्रभृतीनि च

2.1.18 पारे मध्ये षष्ठ्या वा

2.1.19 सङ्ख्या वंश्येन सङ्ख्या 20

2.1.20 नदीभिश्च नदीभिः 21

(वा०) समाहारे चायमिष्यते

2.1.21 अन्यपदार्थे च संज्ञायाम्

**(तत्पुरुषसमास-प्रकरणम्)**

2.1.22 तत्पुरुषः 2.2.22

2.1.23 द्विगुश्च

2.1.24 द्वितीया श्रितातीत-पतित-गतात्यस्त-प्राप्तापन्नैः द्वितीया 29

2.1.25 स्वयं क्तेन क्तेन 28

2.1.26 खट्वा क्षेपे

2.1.27 सामि

2.1.28 कालाः 29

2.1.29 अत्यन्तसंयोगे च

2.1.30 तृतीया तत्कृतार्थेन गुणवचनेन तृतीया 35

2.1.31 पूर्व-सदृश-समोनार्थ-कलह-निपुण-मिश्र-श्लक्ष्णैः

2.1.32 कर्तृ-करणे कृता बहुलम् कर्तृकरणे 33

2.1.33 कृत्यैरधिकार्थवचने

2.1.34 अन्नेन व्यञ्जनम्

2.1.35 भक्ष्येण मिश्रीकरणम्

2.1.36 चतुर्थी तदर्थार्थ-बलि-हित-सुख-रक्षितैः

(वा०) तदर्थेन प्रकृतिविकृतभाव एवेष्टः

(वा०) अर्थेन नित्यसमासो विशेष्यलिङ्गता चेति वक्तव्यम्

2.1.37 पञ्चमी भयेन पञ्चमी 39

(वा०) भय-भीत-भीति-भीभिरिति वक्तव्यम्

2.1.38 अपेतापोढ-मुक्त-पतितापत्रस्तैरल्पशः

2.1.39 स्तोकान्तिक-दूरार्थ-कृच्छ्राणि क्तेन

(वा०) शतसहस्रौ परेणेति वक्तव्यम्

2.1.40 सप्तमी शौण्डैः सप्तमी 48

2.1.41 सिद्ध-शुष्क-पक्व-बन्धैश्च

2.1.42 ध्वाङ्क्षेण क्षेपे

2.1.43 कृत्यैर्ऋणे

2.1.44 संज्ञायाम्

2.1.45 क्तेनाहो-रात्रावयवाः क्तेन 47

2.1.46 तत्र

2.1.47 क्षेपे 48

2.1.48 पात्रेसमितादयश्च

2.1.49 पूर्वकालैक-सर्व-जरत्-पुराण-नव-केवलाः समानाधिकरणेन

समानाधिकरणेन 72

2.1.50 दिक्-सङ्ख्ये संज्ञायाम् दिक्संख्ये 51

2.1.51 तद्धितार्थोत्तरपद-समाहारे च

(वा०) द्वन्द्वतत्पुरुषयोरुत्तरपदे नित्यसमासवचनम्

(वा०) सर्वनाम्नो वृत्तिमात्रे पुंवद्भावः

2.1.52 सङ्ख्यापूर्वो द्विगुः

2.1.53 कुत्सितानि कुत्सनैः

2.1.54 पापाणके कुत्सितैः

2.1.55 उपमानानि सामान्यवचनैः

2.1.56 उपमितं व्याघ्रादिभिः सामान्याप्रयोगे

2.1.57 विशेषणं विशेष्येण बहुलम्

विशेषणं विशेष्येण 58

2.1.58 पूर्वापर-प्रथम-चरम-जघन्य-समान-मध्य-मध्यम-वीराश्च

2.1.59 श्रेण्यादयः कृतादिभिः

2.1.60 क्तेन नञ्विशिष्टेनानञ्

(वा०) शाकपार्थिवादीनां सिद्धय उत्तरपद-लोपस्योपसङ्ख्यानम्

2.1.61 सन्-महत्-परमोत्तमोत्कृष्टाः पूज्यमानैः

2.1.62 वृन्दारक-नाग-कुञ्जरैः पूज्यमानम्

2.1.63 कतर-कतमौ जातिपरिप्रश्ने

2.1.64 किं क्षेपे

2.1.65 पोटा-युवति-स्तोक-कतिपय-गृष्टि-धेनु-वशा-वेहद्-बष्कयणी-प्रवक्तृ-श्रोत्रिया-ऽध्यापक-धूर्तैर्जातिः जातिः 66

2.1.66 प्रशंसावचनैश्च

2.1.67 युवा खलति-पलित-वलिन-जरतीभिः

2.1.68 कृत्य-तुल्याख्या अजात्या

2.1.69 वर्णो वर्णेन

2.1.70 कुमारः श्रमणादिभिः

2.1.71 चतुष्पादो गर्भिण्या

2.1.72 मयूरव्यंसकादयश्च

॥ इति अष्टाध्यायीसूत्रपाठे द्वितीयाध्यायस्य प्रथमः पादः ॥

# अथ द्वितीयाध्यायस्य द्वितीयः पादः

2.2.1 पूर्वापराधरोत्तरमेकदेशिनैकाधिकरणे एकदेशिनैकाधिकरणे 3

2.2.2 अर्धं नपुंसकम्

2.2.3 द्वितीय-तृतीय-चतुर्थ-तुर्याण्यन्यतर-स्याम् अन्यतरस्याम् 4

2.2.4 प्राप्तापन्ने च द्वितीयया

2.2.5 कालाः परिमाणिना

2.2.6 नञ्

2.2.7 ईषदकृता

2.2.8 षष्ठी 17

2.2.9 याजकादिभिश्च

2.2.10 न निर्धारणे न 16

2.2.11 पूरण-गुण-सुहितार्थ-सदव्यय-तव्य-समानाधिकरणेन

2.2.12 क्तेन च पूजायाम् क्तेन 13

2.2.13 अधिकरणवाचिना च

2.2.14 कर्मणि च

2.2.15 तृजकाभ्यां कर्तरि अकेन 17

2.2.16 कर्तरि च

2.2.17 नित्यं क्रीडा-जीविकयोः नित्यम् 19

2.2.18 कु-गति-प्रादयः

(वा०) प्रादयो गताद्यर्थे प्रथमया

(वा०) अत्यादयः क्रान्ताद्यर्थे द्वितीयया

(वा०) अवादयः क्रुष्टाद्यर्थे तृतीयया

(वा०) पर्यादयो ग्लानाद्यर्थे चतुर्थ्या

(वा०) निरादयः क्रान्ताद्यर्थे पञ्चम्या

2.2.19 उपपदमतिङ् उपपदम् 22

2.2.20 अमैवाव्ययेन 21

2.2.21 तृतीयाप्रभृतीन्यन्यतरस्याम् 22

2.2.22 क्त्वा च

**(बहुव्रीहिसमास-प्रकरणम्)**

2.2.23 शेषो बहुव्रीहिः 28

2.2.24 अनेकमन्यपदार्थे अनेकम् 29

(वा०) प्रादिभ्यो धातजस्य वाच्यो वा चोत्तरपदलोपः

(वा०) नञोऽस्त्यर्थानां वाच्यो वा चोत्तरपदलोपः

2.2.25 सङ्ख्ययाऽव्ययासन्नादूराधिकसङ्ख्याः सङ्ख्येये

2.2.26 दिङ्नामान्यन्तराले

2.2.27 तत्र तेनेदमिति सरूपे

2.2.28 तेन सहेति तुल्ययोगे

**(द्वन्द्वसमास-प्रकरणम्)**

2.2.29 चार्थे द्वन्द्वः

**(पूर्वनिपात-प्रकरणम्)**

2.2.30 उपसर्जनं पूर्वम् उपसर्जनम् 31; पूर्वम् 38

2.2.31 राजदन्तादिषु परम्

(वा०) धर्मादिष्वनियमः

2.2.32 द्वन्द्वे घि द्वन्द्वे 34

2.2.33 अजाद्यदन्तम्

2.2.34 अल्पाच्तरम्

2.2.35 सप्तमी-विशेषणे बहुव्रीहौ बहुव्रीहौ 37

2.2.36 निष्ठा 37

2.2.37 वाऽऽहिताग्न्यादिषु वा 38

2.2.38 कडाराः कर्मधारये

॥ इति अष्टाध्यायीसूत्रपाठे द्वितीयाध्यायस्य द्वितीयः पादः ॥

# अथ द्वितीयाध्यायस्य तृतीयः पादः

## (विभक्ति-प्रकरणम्)

2.3.1 अनभिहिते 73
2.3.2 कर्मणि द्वितीया कर्मणि 3; द्वितीया 5
(वा०) उभसर्वतसोः कार्या धिगुपर्यादिषु त्रिषु द्वितीयाम्रेडितान्तेषु ततोऽन्यत्रापि दृश्यते
(वा०) अभितः-परितः-समया-निकषा-हा-प्रतियोगेषु
2.3.3 तृतीया च होश्छन्दसि
2.3.4 अन्तरान्तरेण युक्ते
2.3.5 कालाध्वनोरत्यन्तसंयोगे कालाध्वनोः 7; अत्यन्तसंयोगे 6
2.3.6 अपवर्गे तृतीया
2.3.7 सप्तमी-पञ्चम्यौ कारकमध्ये
2.3.8 कर्मप्रवचनीययुक्ते द्वितीया क..क्ते 11
2.3.9 यस्मादधिकं यस्य चेश्वरवचनं तत्र सप्तमी
2.3.10 पञ्चम्यपाङ्-परिभिः पञ्चमी 11
2.3.11 प्रतिनिधि-प्रतिदाने च यस्मात्
2.3.12 गत्यर्थकर्मणि द्वितीया-चतुर्थ्यौ चेष्टायामनध्वनि
2.3.13 चतुर्थी संप्रदाने चतुर्थी 17
(वा०) तादर्थ्ये चतुर्थी वाच्या
(वा०) हितयोगे च
(वा०) क्लृपिसम्पद्यमाने चतुर्थी वक्तव्या
2.3.14 क्रियार्थोपपदस्य च कर्मणि स्थानिनः
2.3.15 तुमर्थाच्च भाववचनात्
2.3.16 नमःस्वस्ति-स्वाहा-स्वधा-ऽलं-वषड्-योगाच्च
2.3.17 मन्यकर्मण्यनादरे विभाषाऽप्राणिषु
2.3.18 कर्तृ-करणयोस्तृतीया तृतीया 23
(वा०) प्रकृत्यादिभ्य उपसङ्ख्यानम्
2.3.19 सहयुक्तेऽप्रधाने
2.3.20 येनाङ्गविकारः
2.3.21 इत्थंभूतलक्षणे
2.3.22 संज्ञोऽन्यतरस्यां कर्मणि
2.3.23 हेतौ 27
2.3.24 अकर्तर्यृणे पञ्चमी पञ्चमी 25
2.3.25 विभाषा गुणेऽस्त्रियाम्
2.3.26 षष्ठी हेतुप्रयोगे 27
2.3.27 सर्वनाम्नस्तृतीया च
(वा०) निमित्तपर्यायप्रयोगे सर्वासां प्रायदर्शनम्
2.3.28 अपादाने पञ्चमी पञ्चमी 35
(वा०) गम्यमानापि क्रिया कारकविभक्तीनां निमित्तम्
(वा०) पञ्चमीविधाने ल्यब्लोपे कर्मण्युपसङ्ख्यानम्
(वा०) अधिकरणे चोपसङ्ख्यानम्
(वा०) प्रश्नाख्यानयोश्च पञ्चमी वक्तव्या
(वा०) यतश्चाध्वकालनिर्माणं तत्र पञ्चमी वक्तव्या
(वा०) तद्युक्तात् काले सप्तमी वक्तव्या
(वा०) अध्वनः प्रथमा सप्तमी च वक्तव्या
2.3.29 अन्यारादितरर्ते-दिक्छब्दाञ्चूत्तरपदा-जाहि-युक्ते
2.3.30 षष्ठ्यतसर्थप्रत्ययेन
2.3.31 एनपा द्वितीया द्वितीया 32

2.3.32 पृथग्-विना-नानाभिस्तृतीयाऽन्य-तरस्याम् तृतीया 33

2.3.33 करणे च स्तोकाल्प-कृच्छ्र-कतिपय-स्यासत्त्ववचनस्य असत्त्ववचनस्य 35

2.3.34 दूरान्तिकार्थैः षष्ठ्यन्यतरस्याम्

2.3.35 दूरान्तिकार्थेभ्यो द्वितीया च दूरान्तिकार्थेभ्यः 36

2.3.36 सप्तम्यधिकरणे च सप्तमी 41

(वा०) निमित्तात् कर्मसंयोगे सप्तमी वक्तव्या

2.3.37 यस्य च भावेन भावलक्षणम् 38

2.3.38 षष्ठी चानादरे षष्ठी 41

2.3.39 स्वामीश्वराधिपति-दायाद-साक्षि-प्रतिभू-प्रसूतैश्च

2.3.40 आयुक्त-कुशलाभ्यां चासेवायाम्

2.3.41 यतश्च निर्धारणम् 42

2.3.42 पञ्चमी विभक्ते

2.3.43 साधु-निपुणाभ्यामर्चायां सप्तम्यप्रतेः सप्तमी 45

2.3.44 प्रसितोत्सुकाभ्यां तृतीया च तृतीया 45

2.3.45 नक्षत्रे च लुपि

2.3.46 प्रातिपदिकार्थ-लिङ्ग-परिमाण-वचन-मात्रे प्रथमा प्रथमा 49

(वा०) तिङ्-सामानाधिकरण्ये प्रथमा

2.3.47 सम्बोधने च सम्बोधने 49

2.3.48 साऽऽमन्त्रितम्

2.3.49 एकवचनं सम्बुद्धिः

2.3.50 षष्ठी शेषे 73

2.3.51 ज्ञोऽविदर्थस्य करणे

2.3.52 अधीगर्थ-दयेशां कर्मणि कर्मणि 61

2.3.53 कृञः प्रतियत्ने

2.3.54 रुजार्थानां भाववचनानामज्वरेः

2.3.55 आशिषि नाथः

2.3.56 जासि-निप्रहण-नाट-क्राथ-पिषां हिंसायाम्

2.3.57 व्यवहृ-पणोः समर्थयोः

2.3.58 दिवस्तदर्थस्य 60

2.3.59 विभाषोपसर्गे

2.3.60 द्वितीया ब्राह्मणे

2.3.61 प्रेष्य-ब्रुवोर्हविषो देवतासम्प्रदाने

2.3.62 चतुर्थ्यर्थे बहुलं छन्दसि ब..सि 63

2.3.63 यजेश्च करणे

2.3.64 कृत्वोऽर्थप्रयोगे कालेऽधिकरणे

2.3.65 कर्तृ-कर्मणोः कृति

2.3.66 उभयप्राप्तौ कर्मणि

2.3.67 क्तस्य च वर्तमाने क्तस्य 68

2.3.68 अधिकरणवाचिनश्च

2.3.69 न लोकाव्यय-निष्ठा-खलर्थ-तृनाम् न 70

(वा०) कमेरनिषेधः

2.3.70 अकेनोर्भविष्यदाधमर्ण्ययोः

2.3.71 कृत्यानां कर्तरि वा

2.3.72 तुल्यार्थैरतुलोपमाभ्यां तृतीया-ऽन्यतरस्याम् अन्यतरस्याम् 73

2.3.73 चतुर्थी चाशिष्यायुष्य-मद्र-भद्र-कुशल-सुखार्थ-हितैः

॥ इति अष्टाध्यायीसूत्रपाठे द्वितीयाध्यायस्य तृतीयः पादः ॥

# अथ द्वितीयाध्यायस्य चतुर्थः पादः

**(एकवद्भाव-प्रकरणम्)**

2.4.1 द्विगुरेकवचनम् एकवचनम् 16

2.4.2 द्वन्द्वश्च प्राणि-तूर्य-सेनाङ्गानाम् द्वन्द्वः 16

2.4.3 अनुवादे चरणानाम्

2.4.4 अध्वर्युक्रतुरनपुंसकम्

2.4.5 अध्ययनतोऽविप्रकृष्टाख्यानाम्

2.4.6 जातिरप्राणिनाम्

2.4.7 विशिष्टलिङ्गो नदी-देशोऽग्रामाः

2.4.8 क्षुद्रजन्तवः

2.4.9 येषां च विरोधः शाश्वतिकः

2.4.10 शूद्राणामनिरवसितानाम्

2.4.11 गवाश्वप्रभृतीनि च

2.4.12 विभाषा वृक्ष-मृग-तृण-धान्य-व्यञ्जन-पशु-शकुन्यश्ववडव-पूर्वापरा-धरोत्तराणाम् विभाषा 13

2.4.13 विप्रतिषिद्धं चानधिकरणवाचि

2.4.14 न दधिपयआदीनि

2.4.15 अधिकरणैतावत्त्वे च अ..त्त्वे 16

2.4.16 विभाषा समीपे

**(लिङ्ग-प्रकरणम्)**

2.4.17 स नपुंसकम् नपुंसकम् 25

(वा०) सामन्ये नपुंसकम्

2.4.18 अव्ययीभावश्च

(वा०) पथः सङ्ख्याव्ययादेः क्लीबतेष्यते

(वा०) क्रियाविशेषणानां कर्मत्वं क्लीबता चेष्यते

2.4.19 तत्पुरुषोऽनञ्-कर्मधारयः 25

2.4.20 संज्ञायां कन्थोशीनरेषु

2.4.21 उपज्ञोपक्रमं तदाद्याचिख्यासायाम्

2.4.22 छाया बाहुल्ये

2.4.23 सभा राजाऽमनुष्यपूर्वा सभा 24

2.4.24 अशाला च

2.4.25 विभाषा सेना-सुरा-च्छाया-शाला-निशानाम्

2.4.26 परवल्लिङ्गं द्वन्द्व-तत्पुरुषयोः

(वा०) द्विगुप्राप्तापन्नालम्पूर्वगतिसमासेषु प्रतिषेधो वाच्यः

2.4.27 पूर्ववदश्व-वडवौ पूर्ववत् 28

2.4.28 हेमन्त-शिशिरावहो-रात्रे च च्छन्दसि

2.4.29 रात्राह्नाहाः पुंसि

(वा०) सङ्ख्यापूर्वं रात्रं क्लीबम्

2.4.30 अपथं नपुंसकम् नपुंसकम् 31

2.4.31 अर्धर्चाः पुंसि च

**(अन्वादेश-प्रकरणम्)**

2.4.32 इदमोऽन्वादेशेऽशनुदात्तस्तृतीयादौ इदमः, अन्वादेशे, अनुदात्तः 34; अश् 33

2.4.33 एतदस्त्र-तसोस्त्र-तसौ चानुदात्तौ एतद् 34

2.4.34 द्वितीया-टौस्स्वेनः

(वा०) अन्वादेशे नपुंसके वा एनद्वक्तव्यः

**(धात्वादेश-प्रकरणम्)**

2.4.35 आर्धधातुके 57

2.4.36 अदो जग्धिर्ल्यप्-ति किति अदः 40

2.4.37 लुङ्-सनोर्घस्लृ घस्लृ 40

2.4.38 घञपोश्च

2.4.39 बहुलं छन्दसि

2.4.40 लिट्यन्यतरस्याम् 41

2.4.41 वेञो वयिः

2.4.42 हनो वध लिङि हनः, वध 44

2.4.43 लुङि च लुङि 44

2.4.44 आत्मनेपदेष्वन्यतरस्याम्

2.4.45 इणो गा लुङि इणः 47

2.4.46 णौ गमिरबोधने गमिः 48; अबोधने 47

2.4.47 सनि च सनि 48

2.4.48 इङश्च इङः 51

2.4.49 गाङ् लिटि गाङ् 51

2.4.50 विभाषा लुङ्-लृङोः विभाषा 51

2.4.51 णौ च संश्चङोः

2.4.52 अस्तेर्भूः

2.4.53 ब्रुवो वचिः

2.4.54 चक्षिङः ख्याञ् 55

2.4.55 वा लिटि

2.4.56 अजेर्व्यघञपोः अजेः, वी 57

2.4.57 वा यौ

**(लुक्-प्रकरणम्)**

2.4.58 ण्य-क्षत्रियार्ष-ञितो यूनि लुगणिञोः
यूनि 61; लुक् 83

2.4.59 पैलादिभ्यश्च

2.4.60 इञः प्राचाम्

2.4.61 न तौल्वलिभ्यः

2.4.62 तद्राजस्य बहुषु तेनैवास्त्रियाम्
बहुषु तेनैव 70; अस्त्रियाम् 65

2.4.63 यस्कादिभ्यो गोत्रे गोत्रे 70

2.4.64 यञञोश्च

2.4.65 अत्रि-भृगु-कुत्स-वसिष्ठ-गोतमाङ्गिरोभ्यश्च

2.4.66 बह्वच इञः प्राच्य-भरतेषु

2.4.67 न गोपवनादिभ्यः

2.4.68 तिक-कितवादिभ्यो द्वन्द्वे

2.4.69 उपकादिभ्योऽन्यतरस्यामद्वन्द्वे

2.4.70 आगस्त्य-कौण्डिन्ययोरगस्तिकुण्डिनच्

2.4.71 सुपो धातु-प्रातिपदिकयोः

2.4.72 अदि-प्रभृतिभ्यः शपः
अदिप्रभृतिभ्यः 73; शपः 76

2.4.73 बहुलं छन्दसि

2.4.74 यङोऽचि च

2.4.75 जुहोत्यादिभ्यः श्लुः 76

2.4.76 बहुलं छन्दसि

2.4.77 गाति-स्था-घु-पा-भूभ्यः सिचः परस्मैपदेषु सिचः 79; परस्मैपदेषु 78

(वा०) गा-पोर्ग्रहणे इण्पिबत्योर्ग्रहणम्

2.4.78 विभाषा घ्रा-धेट्-शा-च्छा-सः
विभाषा 79

2.4.79 तनादिभ्यस्त-थासोः

2.4.80 मन्त्रे घस-ह्वर-णश-वृ-दहाद्-वृच्-कृ-गमि-जनिभ्यो लेः लेः 81

2.4.81 आमः

2.4.82 अव्ययादाप्-सुपः सुपः 84

2.4.83 नाव्ययीभावादतोऽम् त्वपञ्चम्याः
अव्ययीभावाद् अतः अम् 84

2.4.84 तृतीया-सप्तम्योर्बहुलम्

2.4.85 लुटः प्रथमस्य डा-रौ-रसः

॥ इति अष्टाध्यायीसूत्रपाठे द्वितीयाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे द्वितीयोऽध्यायः॥

# अथ तृतीयोऽध्यायः

## अथ प्रथमः पादः

(प्रत्ययाधिकारः)

3.1.1 प्रत्ययः 5.4.160

3.1.2 परश्च 5.4.160

3.1.3 आद्युदात्तश्च 5.4.160

3.1.4 अनुदत्तौ सुप्-पितौ

(सनादयः)

3.1.5 गुप्-तिज्-किद्भ्यः सन् सन् 7

3.1.6 मान्-बध-दान्-शान्भ्यो दीर्घश्चाभ्या-सस्य

3.1.7 धातोः कर्मणः समानकर्तृकादिच्छायां वा कर्मणः 10; इच्छायाम् 9; वा 22

(वा०) आशङ्कायामुपसङ्ख्यानम्

3.1.8 सुप आत्मनः क्यच् सुपः 11; आत्मनः 9; क्यच् 10

3.1.9 काम्यच्च

3.1.10 उपमानादाचारे 11

(वा०) अधिकरणाच्चेति वक्तव्यम्

3.1.11 कर्तुः क्यङ् सलोपश्च क्यङ् 18

(वा०) सर्वप्रातिपदिकेभ्यः क्विब्वा वक्तव्यः

3.1.12 भृशादिभ्यो भुव्यच्वेर्लोपश्च हलः भुवि अच्वेः 13

3.1.13 लोहितादि-डाज्भ्यः क्यष्

3.1.14 कष्टाय क्रमणे

3.1.15 कर्मणो रोमन्थ-तपोभ्यां वर्ति-चरोः कर्मणः 21

3.1.16 बाष्पोष्माभ्यामुद्वमने

3.1.17 शब्द्-वैर-कलहाभ्र-कण्व-मेघेभ्यः करणे करणे 21

3.1.18 सुखादिभ्यः कर्तृ वेदनायाम्

3.1.19 नमो-वरिवश्-चित्रङः क्यच्

3.1.20 पुच्छ-भाण्ड-चीवराण् णिङ्

3.1.21 मुण्ड-मिश्र-श्लक्ष्ण-लवण-व्रत-वस्त्र-हल-कल-कृत-तूस्तेभ्यो णिच्

3.1.22 धातोरेकाचो हलादेः क्रियासमभिहारे यङ् धातोः 90; यङ् 24

3.1.23 नित्यं कौटिल्ये गतौ नित्यम् 24

3.1.24 लुप-सद-चर-जप-जभ-दह-दश-गृभ्यो भावगर्हायाम्

3.1.25 सत्याप-पाश-रूप-वीणा-तूल-श्लोक-सेना-लोम-त्वच-वर्म-वर्ण-चूर्ण-चुरादिभ्यो णिच् णिच् 26

(वा०) अर्थवेदसत्यानामापुग् वक्तव्यः

3.1.26 हेतुमति च

(वा०) आख्यानात्कृतस्तदाचष्टे, इति णिच्, कृल्लुक्, प्रकृतिप्रत्यापत्तिः, प्रकृतिवच्च कारकम्

3.1.27 कण्ड्वादिभ्यो यक्

3.1.28 गुपू-धूप-विच्छि-पणि-पनिभ्य आयः

3.1.29 ऋतेरीयङ्

3.1.30 कमेर्णिङ्

3.1.31 आयादय आर्धधातुके वा

3.1.32 सनाद्यन्ता धातवः

(विकरणाः)

3.1.33 स्य-तासी लृ-लुटोः

3.1.34 सिब्बहुलं लेटि

(वा०) सिब्बहुलं णिद्वक्तव्यः

3.1.35 कास्-प्रत्ययादाममन्त्रे लिटि

आम् 40; अमन्त्रे लिटि 39

(वा०) कास्यनेकाच आम् वक्तव्यः

3.1.36 इजादेश्च गुरुमतोऽनृच्छः

(वा०) ऊर्णोतेराम्नेति वाच्यम्

3.1.37 दयायासश्च

3.1.38 उष-विद-जागृभ्योऽन्यतरस्याम्

अन्यतरस्याम् 39

3.1.39 भी-ह्री-भृ-हुवां श्लुवच्च

3.1.40 कृञ् चानुप्रयुज्यते लिटि

3.1.41 विदाङ्कुर्वन्त्वित्यन्यतरस्याम्

अन्यतरस्याम् 42

3.1.42 अभ्युत्सादयां-प्रजनयां-चिकयां-रमया-मकः पावयांक्रियाद् विदामक्रन्निति च्छन्दसि

3.1.43 च्लि लुङि — लुङि 66

3.1.44 च्लेः सिच् — च्लेः 66

(वा०) स्पृश-मृश-कृष-तृप-दृपां च्लेः सिज्वा वाच्यः

3.1.45 शल इगुपधादनिटः क्सः — क्सः 47

3.1.46 श्लिष आलिङ्गने

3.1.47 न दृशः

3.1.48 णि-श्रि-द्रु-स्रुभ्यः कर्तरि चङ्

कर्तरि 61; चङ् 51

(वा०) कमेश्च्लेश्चङ् वक्तव्यः

3.1.49 विभाषा धेट्-श्व्योः — विभाषा 50

3.1.50 गुपेश्छन्दसि — छन्दसि 51

3.1.51 नोनयति-ध्वनयत्येलयत्यर्दयतिभ्यः

3.1.52 अस्यति-वक्ति-ख्यातिभ्योऽङ् — अङ् 59

3.1.53 लिपि-सिचि-ह्वश्च — लिपिसिचिह्वः 54

3.1.54 आत्मनेपदेष्वन्यतरस्याम्

3.1.55 पुषादि-द्युताद्यॢदितः परस्मैपदेषु

परस्मैपदेषु 59

3.1.56 सर्ति-शास्त्यर्तिभ्यश्च

3.1.57 इरितो वा — वा 59

(वा०) इर इत्संज्ञा वाच्या

3.1.58 जॄ-स्तम्भु-म्रुचु-म्लुचु-ग्रुचु-ग्लुचु-ग्लुञ्चु-श्विभ्यश्च

3.1.59 कृ-मृ-दृ-रुहिभ्यश्छन्दसि

3.1.60 चिण् ते पदः — चिण् 65; ते 66

3.1.61 दीप-जन-बुध-पूरि-तायि-प्यायिभ्यो-ऽन्यतरस्याम् — अन्यतरस्याम् 63

3.1.62 अचः कर्मकर्तरि — कर्मकर्तरि 65

3.1.63 दुहश्च

3.1.64 न रुधः — न 65

3.1.65 तपोऽनुतापे च

3.1.66 चिण् भाव-कर्मणोः — भावकर्मणोः 67

3.1.67 सार्वधातुके यक् — सार्वधातुके 82

3.1.68 कर्तरि शप् — कर्तरि 88

3.1.69 दिवादिभ्यः श्यन् — श्यन् 72

3.1.70 वा भ्राश-भ्लाश-भ्रमु-क्रमु-क्लमु-त्रसि-त्रुटि-लषः — वा 72

3.1.71 यसोऽनुपसर्गात्

3.1.72 संयसश्च

3.1.73 स्वादिभ्यः श्नुः — श्नुः 76

3.1.74 श्रुवः शृ च
3.1.75 अक्षोऽन्यतरस्याम् अन्यतरस्याम् 76
3.1.76 तनूकरणे तक्षः
3.1.77 तुदादिभ्यः शः
3.1.78 रुधादिभ्यः श्नम्
3.1.79 तनादिकृञ्भ्य उः उः 80
3.1.80 धिन्वि-कृण्व्योर च
3.1.81 क्र्यादिभ्यः श्ना श्ना 82
3.1.82 स्तन्भु-स्तुन्भु-स्कन्भु-स्कुन्भु-स्कुञ्भ्यः श्नुश्च
3.1.83 हलः श्नः शानज्झौ श्नः शानज्झौ 84
3.1.84 छन्दसि शायजपि छन्दसि 86
3.1.85 व्यत्ययो बहुलम्
3.1.86 लिङ्याशिष्यङ्

**(कर्मकर्तृ-प्रकरणम्)**

3.1.87 कर्मवत् कर्मणा तुल्यक्रियः कर्मवत् 90
3.1.88 तपस्तपःकर्मकस्यैव
3.1.89 न दुह-स्नु-नमां यक्-चिणौ
3.1.90 कुषि-रञ्जोः प्राचां श्यन् परस्मैपदं च

**(धात्वधिकारः)**

3.1.91 धातोः 3.4.117
3.1.92 तत्रोपपदं सप्तमीस्थम् तत्र 94

**(कृत्प्रत्ययाः)**

3.1.93 कृदतिङ् कृत् 3.4.76
3.1.94 वाऽसरूपोऽस्त्रियाम्

**(कृत्सु कृत्यप्रत्ययाः)**

3.1.95 कृत्याः 132
3.1.96 तव्यत्-तव्यानीयरः
(वा०) केलिमर उपसङ्ख्यानम्
(वा०) वसेस्तव्यत्कर्तरि णिच्च
3.1.97 अचो यत् यत् 106
(वा०) तकि-शसि-चति-यति-जनिभ्यो यद्वाच्यः
(वा०) हनो वा यद् वधश्च वक्तव्यः
3.1.98 पोरदुपधात्
3.1.99 शकि-सहोश्च
3.1.100 गद-मद-चर-यमश्चानुपसर्गे अनुपसर्गे 108
(वा०) चरेराङि चागुरौ
3.1.101 अवद्य-पण्य-वर्या गर्ह्य-पणितव्या-निरोधेषु
3.1.102 वह्यं करणम्
3.1.103 अर्यः स्वामि-वैश्ययोः
3.1.104 उपसर्या काल्या प्रजने
3.1.105 अजर्यं संगतम्
3.1.106 वदः सुपि क्यप् च सुपि 108; क्यप् 121
3.1.107 भुवो भावे भावे 108
3.1.108 हनस्त च
3.1.109 एति-स्तु-शास्-वृ-दृ-जुषः क्यप्
3.1.110 ऋदुपधाच्चाक्लृपि-चृतेः
3.1.111 ई च खनः
3.1.112 भृञोऽसंज्ञायाम्
3.1.113 मृजेर्विभाषा
3.1.114 राजसूय-सूर्य-मृषोद्य-रुच्य-कुप्य-कृष्टपच्याव्यथ्याः
3.1.115 भिद्योद्ध्यौ नदे

3.1.116 पुष्य-सिध्यौ नक्षत्रे

3.1.117 विपूय-विनीय-जित्या मुञ्ज-कल्क-हलिषु

3.1.118 प्रत्यपिभ्यां ग्रहेः ग्रहेः 119

3.1.119 पदास्वैरि-बाह्या-पक्ष्येषु च

3.1.120 विभाषा कृ-वृषोः

3.1.121 युग्यं च पत्रे

3.1.122 अमावस्यदन्यतरस्याम्

3.1.123 छन्दसि निष्टर्क्य-देवहूय-प्रणीयो-न्नीयोच्छिष्य-मर्य-स्तर्या-ध्वर्य-खन्य-खान्य-देवयज्याऽऽपृच्छ्य-प्रतिषीव्य-ब्रह्मवाद्य-भाव्य-स्ताव्योपचाय्यपृडानि

3.1.124 ऋ-हलोर्ण्यत् ण्यत् 131

3.1.125 ओरावश्यके

3.1.126 आसु-यु-वपि-रपि-लपि-त्रपि-चमश्च

3.1.127 आनाय्योऽनित्ये

3.1.128 प्रणाय्योऽसम्मतौ

3.1.129 पाय्य-सान्नाय्य-निकाय्य-धाय्या मान-हविर्निवास-सामिधेनीषु

3.1.130 क्रतौ कुण्डपाय्य-सञ्चाय्यौ

3.1.131 अग्नौ परिचाय्योपचाय्य-समूह्याः अग्नौ 132

3.1.132 चित्याग्निचित्ये च

**(पूर्वकृदन्त-प्रकरणम्)**

3.1.133 ण्वुल्-तृचौ

3.1.134 नन्दि-ग्रहि-पचादिभ्यो ल्यु-णिन्यचः

(वा०) अज्विधिः सर्वधातुभ्यः पठ्यन्ते च पचादयः । अण्बाधनार्थमेव स्यात् सिध्यन्ति श्वपचादयः ॥

3.1.135 इगुपध-ज्ञा-प्री-किरः कः कः 136

3.1.136 आतश्चोपसर्गे

3.1.137 पा-घ्रा-ध्मा-धेट्-दृशः शः शः 139

3.1.138 अनुपसर्गाल्लिम्प-विन्द-धारि-पारि-वेद्युदेजि-चेति-साति-साहिभ्यश्च अनुपसर्गात् 140

(वा०) गवादिषु विन्देः संज्ञायाम्

3.1.139 ददाति-दधात्योर्विभाषा विभाषा 140

3.1.140 ज्वलिति-कसन्तेभ्यो णः णः 143

3.1.141 श्याद्-व्यधास्रु-संस्रुवतीणवसावहृ-लिह-श्लिष-श्वसश्च

3.1.142 दुन्योरनुपसर्गे

3.1.143 विभाषा ग्रहः ग्रहः 144

(वा०) भवतेश्चेति वक्तव्यम्

3.1.144 गेहे कः

3.1.145 शिल्पिनि ष्वुन् शिल्पिनि 147

(वा०) नृति-खनि-रञ्जिभ्य एव

3.1.146 गस्थकन् गः 147

3.1.147 ण्युट् च ण्युट् 148

3.1.148 हश्च व्रीहि-कालयोः

3.1.149 प्रु-सृ-ल्वः समभिहारे वुन् वुन् 150

3.1.150 आशिषि च

॥ इति अष्टाध्यायीसूत्रपाठे तृतीयाध्यायस्य प्रथमः पादः ॥

# अथ तृतीयाध्यायस्य द्वितीयः पादः

## (पूर्वकृदन्तेषूपपद-प्रकरणम्)

3.2.1 कर्मण्यण् कर्मणि 57; अण् 2

(वा०) शीलि-कामि-भक्ष्याचारिभ्यो णः

3.2.2 ह्वा-वा-मश्च

3.2.3 आतोऽनुपसर्गे कः अनुपसर्गे 60; कः 7

(वा०) मूलविभुजादिभ्यः कः

3.2.4 सुपि स्थः सुपि 83

3.2.5 तुन्द-शोकयोः परिमृजापनुदोः

(वा०) क-प्रकरणे मूलविभुजादिभ्य उपङ्ख्या-नम्

3.2.6 प्रे दा-ज्ञः

3.2.7 समि ख्यः

3.2.8 गा-पोष्टक्

3.2.9 हरतेरनुद्यमनेऽच् हरतेः 11; अच् 15

3.2.10 वयसि च

3.2.11 आङि ताच्छील्ये

3.2.12 अर्हः

3.2.13 स्तम्ब-कर्णयो रमि-जपोः

3.2.14 शमि धातोः संज्ञायाम्

3.2.15 अधिकरणे शेतेः अधिकरणे 16

3.2.16 चरेष्टः चरेः 17; टः 23

3.2.17 भिक्षा-सेनाऽऽदायेषु च

3.2.18 पुरोऽग्रतोऽग्रेषु सर्तेः सर्तेः 19

3.2.19 पूर्वे कर्तरि

3.2.20 कृञो हेतु-ताच्छील्यानुलोम्येषु कृञः 24

3.2.21 दिवा-विभा-निशा-प्रभा-भास्-कारान्ता-नन्तादि-बहु-नान्दी-किं-लिपि-लिबि-बलि-भक्ति-कर्तृ-चित्र-क्षेत्र-सङ्ख्या-जङ्घा-बाह्वहर्-यत्-तद्-धनुररुष्षु

(वा०) किंयत्तद्बहुषु कृञोऽज्विधानम्

3.2.22 कर्मणि भृतौ

3.2.23 न शब्द-श्लोक-कलह-गाथा-वैर-चाटु-सूत्र-मन्त्र-पदेषु

3.2.24 स्तम्ब-शकृतोरिन् इन् 27

3.2.25 हरतेर्दृति-नाथयोः पशौ

3.2.26 फलेग्रहिरात्मम्भरिश्च

3.2.27 छन्दसि वन-सन-रक्षि-मथाम्

3.2.28 एजेः खश् खश् 37

3.2.29 नासिका-स्तनयोर्ध्मा-धेटोः ध्माधेटोः 30

3.2.30 नाडी-मुष्ट्योश्च

3.2.31 उदि कूले रुजि-वहोः

3.2.32 वहाभ्रे लिहः

3.2.33 परिमाणे पचः पचः 34

3.2.34 मित-नखे च

3.2.35 विध्वरुषोस्तुदः

3.2.36 असूर्य-ललाटयोर्दृशि-तपोः

3.2.37 उग्रम्पश्येरम्मद-पाणिन्धमाश्च

3.2.38 प्रिय-वशे वदः खच् खच् 47

(वा०) गमेः सुपि वाच्यः

(वा०) विहायसो विह च

(वा०) खच्च डिद् वा वक्तव्यः

(वा०) डे च विहायसो विहादेशो वक्तव्यः

3.2.39 द्विषत्-परयोस्तापेः

3.2.40 वाचि यमो व्रते

3.2.41 पूः-सर्वयोर्दारि-सहोः
3.2.42 सर्व-कूलाभ्र-करीषेषु कषः
3.2.43 मेघर्ति-भयेषु कृञः कृञः 44
3.2.44 क्षेम-प्रिय-मद्रेऽण् च
3.2.45 आशिते भुवः करण-भावयोः
3.2.46 संज्ञायां भृ-तृ-वृ-जि-धारि-सहि-तपि-दमः संज्ञायाम् 47
3.2.47 गमश्च गमः 48
3.2.48 अन्तात्यन्ताध्व-दूर-पार-सर्वानन्तेषु डः डः 50
(वा०) अन्यत्रापि दृश्यत इति वक्तव्यम्
3.2.49 आशिषि हनः हनः 55
(वा०) कर्मणि समि च
3.2.50 अपे क्लेश-तमसोः
3.2.51 कुमार-शीर्षयोर्णिनिः
3.2.52 लक्षणे जाया-पत्योष्टक् टक् 54
3.2.53 अमनुष्यकर्तृके च
3.2.54 शक्तौ हस्ति-कपाटयोः
3.2.55 पाणिघ-ताडघौ शिल्पिनि
3.2.56 आढ्य-सुभग-स्थूल-पलित-नग्नान्ध-प्रियेषु च्व्यर्थेष्वच्वौ कृञः करणे ख्युन् आ..चौ 57
3.2.57 कर्तरि भुवः खिष्णुच्-खुकञौ
3.2.58 स्पृशोऽनुदके क्विन् क्विन् 60
3.2.59 ऋत्विग्-दधृक्-स्रग्-दिगुष्णिगञ्चु-युजि-क्रुञ्चां च
3.2.60 त्यदादिषु दृशोऽनालोचने कञ् च
(वा०) समानान्ययोश्चेति वक्तव्यम्
(वा०) दृशेः क्सश्च वक्तव्यः

3.2.61 सत्-सू-द्विष-द्रुह-दुह-युज-विद-भिद-च्छिद-जि-नी-राजामुपसर्गेऽपि क्विप् उपसर्गे, अपि 77
3.2.62 भजो ण्विः ण्विः 64
3.2.63 छन्दसि सहः छन्दसि 67
3.2.64 वहश्च वहः 66
3.2.65 कव्य-पुरीष-पुरीष्येषु ञ्युट् ञ्युट् 66
3.2.66 हव्येऽनन्तः पादम्
3.2.67 जन-सन-खन-क्रम-गमो विट् विट् 69
3.2.68 अदोऽनन्ने अदः 69
3.2.69 क्रव्ये च
3.2.70 दुहः कब् घश्च
3.2.71 मन्त्रे श्वेतवहोक्थशस्-पुरोडाशो ण्विन् मन्त्रे, ण्विन् 72
3.2.72 अवे यजः यजः 73
3.2.73 विजुपे छन्दसि विच् 75; छन्दसि 74
3.2.74 आतो मनिन्-क्वनिब्-वनिपश्च मनिन्क्वनिब्विनिपश्च 75
3.2.75 अन्येभ्योऽपि दृश्यन्ते
3.2.76 क्विप् च क्विप् 77
3.2.77 स्थः क च
3.2.78 सुप्यजातौ णिनिस्ताच्छिल्ये णिनिः 86
(वा०) साधुकारिणि च
(वा०) ब्रह्मणि वदः
3.2.79 कर्तर्युपमाने
3.2.80 व्रते
3.2.81 बहुलमाभीक्ष्ण्ये
3.2.82 मनः 83
3.2.83 आत्ममाने खश् च

**(भूतार्थकप्रत्यय-प्रकरणम्)**

3.2.84 भूते 122
3.2.85 करणे यजः
3.2.86 कर्मणि हनः कर्मणि 92; हनः 88
3.2.87 ब्रह्म-भ्रूण-वृत्रेषु क्विप् क्विप् 92
3.2.88 बहुलं छन्दसि
3.2.89 सु-कर्म-पाप-मन्त्र-पुण्येषु कृञः
3.2.90 सोमे सुञः
3.2.91 अग्नौ चेः चेः 92
3.2.92 कर्मण्यग्न्याख्यायाम्
3.2.93 कर्मणीनिर्विक्रियः कर्मणि 95
3.2.94 दृशेः क्वनिप् क्वनिप् 96
3.2.95 राजनि युधि-कृञः युधिकृञः 96
3.2.96 सहे च
3.2.97 सप्तम्यां जनेर्डः जनेः, डः 101
3.2.98 पञ्चम्यामजातौ
3.2.99 उपसर्गे च संज्ञायाम्
3.2.100 अनौ कर्मणि
3.2.101 अन्येष्वपि दृश्यते
3.2.102 निष्ठा
3.2.103 सु-यजोर्ङ्वनिप्
3.2.104 जीर्यतेरतृन्
3.2.105 छन्दसि लिट् छन्दसि 107
3.2.106 लिटः कानज् वा लिटः, वा 109
3.2.107 क्वसुश्च क्वसुः 108
3.2.108 भाषायां सद-वस-श्रुवः
3.2.109 उपेयिवाननाश्वाननूचानश्च
3.2.110 लुङ्
3.2.111 अनद्यतने लङ् अनद्यतने 119
3.2.112 अभिज्ञावचने लृट् 114
3.2.113 न यदि
3.2.114 विभाषा साकाङ्क्षे
3.2.115 परोक्षे लिट् परोक्षे 118; लिट् 117
3.2.116 ह-शश्वतोर्लङ् च लङ् 117
3.2.117 प्रश्ने चासन्नकाले
3.2.118 लट् स्मे लट् 122; स्मे 119
3.2.119 अपरोक्षे च
3.2.120 ननौ पृष्टप्रतिवचने पृष्टप्रतिवचने 121
3.2.121 न-न्वोर्विभाषा विभाषा 122
3.2.122 पुरि लुङ् चास्मे

**(वर्तमानार्थकप्रत्यय-प्रकरणम्)**

3.2.123 वर्तमाने लट् वर्तमाने 3.3.1
3.2.124 लटः शतृ-शानचावप्रथमा-समानाधिकरणे लटः, शतृशानचौ 126
3.2.125 सम्बोधने च
3.2.126 लक्षण-हेत्वोः क्रियायाः
3.2.127 तौ सत्
3.2.128 पूङ्-यजोः शानन्
3.2.129 ताच्छील्य-वयो-वचन-शक्तिषु चानश्
3.2.130 इङ्-धार्योः शत्रकृच्छ्रिणि शतृ 133
3.2.131 द्विषोऽमित्रे
3.2.132 सुञो यज्ञसंयोगे
3.2.133 अर्हः प्रशंसायाम्
3.2.134 आ क्वेस्तच्छील-तद्धर्म-तत्साधुकारिषु तच्छीलतद्धर्मतत्साधुकारिषु 177
3.2.135 तृन्

3.2.136 अलंकृञ्-निराकृञ्-प्रजनोत्पचो-त्पतोन्मद-रुच्यपत्रप-वृतु-वृधु-सह-चर इष्णुच् इष्णुच् 138
3.2.137 णेश्छन्दसि छन्दसि 138
3.2.138 भुवश्च भुवः 139
3.2.139 ग्ला-जि-स्थश्च क्स्नुः
3.2.140 त्रसि-गृधि-धृषि-क्षिपेः क्नुः
3.2.141 शमित्यष्टाभ्यो घिनुण् घिनुण् 145
3.2.142 संपृचानुरुधाङ्यमाङ्यस-परिसृ-संसृज-परिदेवि-संज्वर-परिक्षिप-परिरट-परिवद-परिदह-परिमुह-दुष-द्विष-द्रुह-दुह-युजाक्रीड-विविच-त्यज-रज-भजातिचरापचरामुषाभ्या-हनश्च
3.2.143 वौ कष-लस-कत्थ-स्रम्भः वौ 144
3.2.144 अपे च लषः
3.2.145 प्रे लप-सृ-द्रु-मथ-वद-वसः
3.2.146 निन्द-हिंस-क्लिश-खाद-विनाश-परिक्षिप-परिरट-परिवादि-व्याभाषा-सूयो वुञ् वुञ् 147
3.2.147 देवि-क्रुशोश्चोपसर्गे
3.2.148 चलन-शब्दार्थादकर्मकाद् युच् अकर्मकाद् 149; युच् 153
3.2.149 अनुदात्तेतश्च हलादेः
3.2.150 जु-चङ्क्रम्य-दन्द्रम्य-सृ-गृधि-ज्वल-शुच-लष-पत-पदः
3.2.151 क्रुध-मण्डार्थेभ्यश्च
3.2.152 न यः न 153
3.2.153 सूद-दीप-दीक्षश्च
3.2.154 लष-पत-पद-स्था-भू-वृष-हन-कम-गम-शॄभ्य उकञ्
3.2.155 जल्प-भिक्ष-कुट्ट-लुण्ट-वृङः षाकन्
3.2.156 प्रजोरिनिः इनिः 157
3.2.157 जि-दृ-क्षि-विश्रीण्-वमाव्यथाभ्यम-परिभू-प्रसूभ्यश्च
3.2.158 स्पृहि-गृहि-पति-दयि-निद्रा-तन्द्रा-श्रद्धाभ्य आलुच्
3.2.159 दा-धेट्-सि-शद-सदो रुः
3.2.160 सृ-घस्यदः क्मरच्
3.2.161 भञ्ज-भास-मिदो घुरच्
3.2.162 विदि-भिदि-च्छिदेः कुरच्
3.2.163 इण्-नश्-जि-सर्तिभ्यः क्वरप् क्वरप् 164
3.2.164 गत्वरश्च
3.2.165 जागुरूकः ऊकः 166
3.2.166 यज-जप-दशां यङः
3.2.167 नमि-कम्पि-स्म्यजस-कम-हिंस-दीपो रः
3.2.168 सनाशंस-भिक्ष उः उः 170
3.2.169 विन्दुरिच्छुः
3.2.170 क्याच्छन्दसि छन्दसि 171
3.2.171 आदृ-गम-हन-जनः कि-किनौ लिट् च
(वा०) भाषायां धाञ्-कृ-सृ-गमि-जनि-नमिभ्यः
3.2.172 स्वपि-तृषोर्नजिङ्
3.2.173 शॄ-वन्द्योरारुः
3.2.174 भियः क्रु-क्लुकनौ
3.2.175 स्थेश-भास-पिस-कसो वरच् वरच् 176
3.2.176 यश्च यङः

3.2.177 भ्राज-भास-धुर्-विद्युतोर्जि-पॄ-जु-ग्रावस्तुवः क्विप् क्विप् 179

3.2.178 अन्येभ्योऽपि दृश्यते

(वा०) क्विब्वचिप्रच्छ्यायतस्तुकटप्रुजुश्रीणां दीर्घोऽसम्प्रसारणं च

3.2.179 भुवः संज्ञान्तरयोः भुवः 180

3.2.180 वि-प्र-सम्भ्यो ड्वसंज्ञायाम्

(वा०) डुप्रकरणे मितद्र्वादिभ्य उपसङ्ख्यानम्

3.2.181 धः कर्मणि ष्ट्रन् ष्ट्रन् 183

3.2.182 दाम्-नी-शस-यु-युज-स्तु-तुद-सि-सिच-मिह-पत-दश-नहः करणे करणे 186

3.2.183 हल-सूकरयोः पुवः

3.2.184 अर्ति-लू-धू-सू-खन-सह-चर इत्रः इत्रः 186

3.2.185 पुवः संज्ञायाम् पुवः 186

3.2.186 कर्तरि चर्षि-देवतयोः

3.2.187 ञीतः क्तः क्तः 188

3.2.188 मति-बुद्धि-पूजार्थेभ्यश्च

॥ इति अष्टाध्यायीसूत्रपाठे तृतीयाध्यायस्य द्वितीयः पादः ॥

## अथ तृतीयाध्यायस्य तृतीयः पादः

**(उत्तरकृदन्त-प्रकरणम्)**

3.3.1 उणादयो बहुलम् उणादयः 3

3.3.2 भूतेऽपि दृश्यन्ते

**(भविष्यदर्थकप्रत्यय-प्रकरणम्)**

3.3.3 भविष्यति गम्यादयः भविष्यति 15

3.3.4 यावत्पुरानिपातयोर्लट्

3.3.5 विभाषा कदा-कर्ह्योः विभाषा 9

3.3.6 किंवृत्ते लिप्सायाम्

3.3.7 लिप्स्यमानसिद्धौ च

3.3.8 लोडर्थलक्षणे च लोडर्थलक्षणे 9

3.3.9 लिङ् चोर्ध्वमौहूर्तिके

3.3.10 तुमुन्-ण्वुलौ क्रियायां क्रियार्थायाम् क्रियायां क्रियार्थायाम् 13

3.3.11 भाववचनाश्च

3.3.12 अण् कर्मणि च

3.3.13 लृट् शेषे च

3.3.14 लृटः सद् वा

3.3.15 अनद्यतने लुट्

3.3.16 पद-रुज-विश-स्पृशो घञ् घञ् 55

3.3.17 सृ स्थिरे

**(भावाधिकारः)**

3.3.18 भावे 112

3.3.19 अकर्तरि च कारके संज्ञायाम् 112

3.3.20 परिमाणाख्यायां सर्वेभ्यः

(वा०) दार-जारौ कर्तरि णिलुक् च

3.3.21 इङश्च

3.3.22 उपसर्गे रुवः

3.3.23 समि यु-द्रु-दुवः

3.3.24 श्रि-णी-भुवोऽनुपसर्गे

3.3.25 वौ क्षु-श्रुवः

3.3.26 अवोदोर्नियः

3.3.27 प्रे द्रु-स्तु-स्रुवः
3.3.28 निरभ्योः पू-ल्वोः
3.3.29 उन्न्योर्ग्रः उन्न्योः 30
3.3.30 कॄ धान्ये
3.3.31 यज्ञे समि स्तुवः
3.3.32 प्रे स्त्रोऽयज्ञे स्त्रः 34
3.3.33 प्रथने वावशब्दे वौ 34
3.3.34 छन्दोनाम्नि च
3.3.35 उदि ग्रहः ग्रहः 36
3.3.36 समि मुष्टौ
3.3.37 परि-न्योर्नीणोर्द्यूताभ्रेषयोः
3.3.38 परावनुपात्यय इणः
3.3.39 व्युपयोः शेतेः पर्याये
3.3.40 हस्तादाने चेरस्तेये चेः 42
3.3.41 निवास-चिति-शरीरोपसमाधानेष्वादेश्च कः आदेश्च कः 42
3.3.42 सङ्घे चानौत्तराधर्ये
3.3.43 कर्मव्यतिहारे णच् स्त्रियाम्
3.3.44 अभिविधौ भाव इनुण्
3.3.45 आक्रोशेऽव-न्योर्ग्रहः ग्रहः 47
3.3.46 प्रे लिप्सायाम्
3.3.47 परौ यज्ञे
3.3.48 नौ वृ धान्ये
3.3.49 उदि श्रयति-यौति-पू-द्रुवः
3.3.50 विभाषाऽऽङि रु-प्लुवोः विभाषा 55
3.3.51 अवे ग्रहो वर्षप्रतिबन्धे ग्रहः 53
3.3.52 प्रे वणिजाम् प्रे 54
3.3.53 रश्मौ च
3.3.54 वृणोतेराच्छादने
3.3.55 परौ भुवोऽवज्ञाने
3.3.56 एरच्
(वा०) भयादीनामुपसङ्ख्यानम्
3.3.57 ॠदोरप् अप् 87
3.3.58 ग्रह-वृ-दृ-निश्चि-गमश्च
(वा०) घञर्थे कविधानम्
3.3.59 उपसर्गेऽदः अदः 60
3.3.60 नौ ण च
3.3.61 व्यध-जपोरनुपसर्गे अनुपसर्गे 65
3.3.62 स्वन-हसोर्वा वा 65
3.3.63 यमः समुप-नि-विषु च
3.3.64 नौ गद-नद-पठ-स्वनः नौ 65
3.3.65 क्वणो वीणायां च
3.3.66 नित्यं पणः परिमाणे
3.3.67 मदोऽनुपसर्गे
3.3.68 प्रमद-सम्मदौ हर्षे
3.3.69 समुदोरजः पशुषु
3.3.70 अक्षेषु ग्लहः
3.3.71 प्रजने सर्तेः
3.3.72 ह्वः संप्रसारणं च न्यभ्युप-विषु ह्वः सम्प्रसारणं च 75
3.3.73 आङि युद्धे
3.3.74 निपानमाहावः
3.3.75 भावेऽनुपसर्गस्य 76
3.3.76 हनश्च वधः हनः 87
3.3.77 मूर्तौ घनः
3.3.78 अन्तर्घनो देशे
3.3.79 अगारैकदेशे प्रघणः प्रघाणश्च
3.3.80 उद्घनोऽत्याधानम्

3.3.81 अपघनोऽङ्गम्
3.3.82 करणेऽयो-वि-द्रुषु करणे 84
3.3.83 स्तम्बे क च
3.3.84 परौ घः
3.3.85 उपघ्न आश्रये
3.3.86 सङ्घोद्घौ गण-प्रशंसयोः
3.3.87 निघो निमितम्
3.3.88 ड्वितः क्त्रिः
3.3.89 ट्वितोऽथुच्
3.3.90 यज-याच-यत-विच्छ-प्रच्छ-रक्षो नङ्
3.3.91 स्वपो नन्
3.3.92 उपसर्गे घोः किः घोः किः 93
3.3.93 कर्मण्यधिकरणे च

(स्त्र्याधिकारः)

3.3.94 स्त्रियां क्तिन् स्त्रियाम् 112; क्तिन् 97
(वा०) श्रु-यजि-स्तुभ्यः करणे
(वा०) ग्ला-म्ला-ज्या-हाभ्यो निः
(वा०) ॠकार-ल्वादिभ्यः क्तिन्निष्ठावद्वाच्यः
(वा०) सम्पदादिभ्यः क्विप्
(वा०) क्तिन्नपीष्यते
3.3.95 स्था-गा-पा-पचो भावे भावे 96
3.3.96 मन्त्रे वृषेष-पच-मन-विद-भू-वी-रा उदात्तः उदात्तः 100
3.3.97 ऊति-यूति-जूति-साति-हेति-कीर्तयश्च
3.3.98 व्रज-यजोर्भावे क्यप् क्यप् 100
3.3.99 संज्ञायां समज-निषद-निपत-मन-विद-षुञ्-शीङ्-भृञिणः
3.3.100 कृञः श च श 101
3.3.101 इच्छा
(वा०) परिचर्या-परिसर्या-मृगयाटाट्यानामुपसङ्ख्यानम्
3.3.102 अ प्रत्ययात् अ 103
3.3.103 गुरोश्च हलः
3.3.104 षिद्भिदादिभ्योऽङ् अङ् 106
(वा०) क्रपेः सम्प्रसारणं च
3.3.105 चिन्ति-पूजि-कथि-कुम्बि-चर्चश्च
3.3.106 आतश्चोपसर्गे
3.3.107 ण्यास-श्रन्थो युच्
3.3.108 रोगाख्यायां ण्वुल् बहुलम् ण्वुल् 110
(वा०) धात्वर्थनिर्देशे ण्वुल्वक्तव्यः
(वा०) इक्श्तिपौ धातुनिर्देशे
(वा०) वर्णात्कारः । रादिफः
(वा०) मत्वर्थाच्छः
(वा०) इक् कृष्यादिभ्यः
3.3.109 संज्ञायाम्
3.3.110 विभाषाख्यान-परिप्रश्नयोरिञ् च विभाषा 111
3.3.111 पर्यायार्हर्णोत्पत्तिषु ण्वुच्
3.3.112 आक्रोशे नञ्यनिः
3.3.113 कृत्य-ल्युटो बहुलम्
3.3.114 नपुंसके भावे क्तः नपुंसके भावे 116
3.3.115 ल्युट् च ल्युट् 117
3.3.116 कर्मणि च येन संस्पर्शात् कर्तुः शरीरसुखम्
3.3.117 करणाधिकरणयोश्च 125
3.3.118 पुंसि संज्ञायां घः प्रायेण पुंसि संज्ञायाम् 125; घः 119; प्रायेण 121

3.3.119 गोचर-संचर-वह-व्रज-व्यजापण-निगमाश्च

3.3.120 अवे तृ-स्त्रोर्घञ् घञ् 125

3.3.121 हलश्च

3.3.122 अध्याय-न्यायोद्याव-संहाराश्च

3.3.123 उदङ्कोऽनुदके

3.3.124 जालमानायः

3.3.125 खनो घ च

3.3.126 ईषद्दुः-सुषु कृच्छ्राकृच्छ्रार्थेषु खल्
ईष..र्थेषु 130; खल् 127

3.3.127 कर्तृ-कर्मणोश्च भू-कृञोः

3.3.128 आतो युच् युच् 130

3.3.129 छन्दसि गत्यर्थेभ्यः छन्दसि 130

3.3.130 अन्येभ्योऽपि दृश्यते

(वा०) भाषायां शासि-युधि-दृशि-धृषि-मृषिभ्यो युज्वाच्यः

**(लकारार्थ-प्रकरणम्)**

3.3.131 वर्तमान-सामीप्ये वर्तमानवद् वा
वर्तमानवद्वा 132

3.3.132 आशंसायां भूतवच्च आशंसायाम् 133

3.3.133 क्षिप्रवचने लृट्

3.3.134 आशंसावचने लिङ्

3.3.135 नानद्यतनवत् क्रियाप्रबन्ध-सामीप्ययोः
न, अनद्यतनवत् 138

3.3.136 भविष्यति मर्यादावचनेऽवरस्मिन्
भ..ति 139; म..ने 138; अवरस्मिन् 137

3.3.137 कालविभागे चानहोरात्राणाम् 138

3.3.138 परस्मिन् विभाषा

3.3.139 लिङ्निमित्ते लृङ् क्रियातिपत्तौ
141

3.3.140 भूते च 159

3.3.141 वोताप्योः 151

3.3.142 गर्हायां लडपि-जात्वोः
गर्हायाम् 144; लट् 143

3.3.143 विभाषा कथमि लिङ् च

3.3.144 किंवृत्ते लिङ्-लृटौ लिङ्लृटौ 145

3.3.145 अनवक्लृप्त्यमर्षयोरकिंवृत्तेऽपि
अनवक्लृप्त्यमर्षयोः 148

3.3.146 किंकिलास्त्यर्थेषु लृट्

3.3.147 जातु-यदोर्लिङ् लिङ् 150

3.3.148 यच्च-यत्रयोः 150

3.3.149 गर्हायां च

3.3.150 चित्रीकरणे च चित्रीकरणे 151

3.3.151 शेषे लृडयदौ

3.3.152 उताप्योः समर्थयोर्लिङ् लिङ् 155

3.3.153 कामप्रवेदनेऽकच्चिति

3.3.154 सम्भावनेऽलमिति चेत् सिद्धाप्रयोगे
155

3.3.155 विभाषा धातौ सम्भावन-वचनेऽयदि
विभाषा 156

3.3.156 हेतु-हेतुमतोर्लिङ्

3.3.157 इच्छार्थेषु लिङ्-लोटौ इच्छार्थेषु 159

3.3.158 समानकर्तृकेषु तुमुन् स..षु 159

3.3.159 लिङ् च लिङ् 160

3.3.160 इच्छार्थेभ्यो विभाषा वर्तमाने

3.3.161 विधि-निमन्त्रणामन्त्रणाधीष्ट-सम्प्रश्न-प्रार्थनेषु लिङ् वि..षु 162

3.3.162 लोट् च लोट् 163

3.3.163 प्रैषातिसर्ग-प्राप्तकालेषु कृत्याश्च
प्रैषातिसर्गप्राप्तकालेषु 165

3.3.164 लिङ् चोर्ध्वमौहूर्तिके ऊर्ध्व..के 165
3.3.165 स्मे लोट् 166
3.3.166 अधीष्टे च
3.3.167 काल-समय-वेलासु तुमुन्
कालसमयवेलासु 168
3.3.168 लिङ् यदि लिङ् 169
3.3.169 अर्हे कृत्य-तृचश्च
3.3.170 आवश्यकाधमर्ण्ययोर्णिनिः
आवश्यकाधमर्ण्ययोः 172
3.3.171 कृत्याश्च कृत्याः 172
3.3.172 शकि लिङ् च
3.3.173 आशिषि लिङ्-लोटौ आशिषि 174
3.3.174 क्तिच्-क्तौ च संज्ञायाम्
3.3.175 माङि लुङ् 176
3.3.176 स्मोत्तरे लङ् च

॥ इति अष्टाध्यायीसूत्रपाठे तृतीयाध्यायस्य तृतीयः पादः ॥

## अथ तृतीयाध्यायस्य चतुर्थः पादः

3.4.1 धातु-सम्बन्धे प्रत्ययाः धातुसम्बन्धे 6
3.4.2 क्रियासमभिहारे लोट् लोटो हिस्वौ वा च त-ध्वमोः लोट्..मोः 3
3.4.3 समुच्चयेऽन्यतरस्याम्
3.4.4 यथाविध्यनुप्रयोगः पूर्वस्मिन्
अनुप्रयोगः 5
5.4.119 उपसर्गाच्च

5.4.120 सुप्रात-सुश्व-सुदिव-शारिकुक्ष-चतुरश्रैणीपदाजपद-प्रोष्ठपदाः

5.4.121 नञ्-दुः-सुभ्यो हलि-सक्थ्योरन्यतर-स्याम् न..भ्यः 122

5.4.122 नित्यमसिच् प्रजा-मेधयोः

असिच् 123

5.4.123 बहुप्रजाश्छन्दसि

5.4.124 धर्मादनिच् केवलात् अनिच् 126

5.4.125 जम्भा सु-हरित-तृण-सोमेभ्यः

5.4.126 दक्षिणेर्मा लुब्धयोगे

5.4.127 इच् कर्मव्यतिहारे इच् 128

5.4.128 द्विदण्ड्यादिभ्यश्च

5.4.129 प्र-सम्भ्यां जानुनोर्ज्ञुः जा..ज्ञुः 130

5.4.130 ऊर्ध्वाद् विभाषा

5.4.131 ऊधसोऽनङ् अनङ् 133

5.4.132 धनुषश्च धनुषः 133

5.4.133 वा संज्ञायाम्

5.4.134 जायाया निङ्

5.4.135 गन्धस्येदुत्-पूति-सु-सुरभिभ्यः

गन्धस्य, इत् 137

5.4.136 अल्पाख्यायाम्

5.4.137 उपमानाच्च उपमानात् 138

5.4.138 पादस्य लोपोऽहस्त्यादिभ्यः

पादस्य लोपः 140

5.4.139 कुम्भपदीषु च

5.4.140 सङ्ख्या-सुपूर्वस्य

5.4.141 वयसि दन्तस्य दतृ दन्तस्य दतृ 145

5.4.142 छन्दसि च

5.4.143 स्त्रियां संज्ञायाम्

5.4.144 विभाषा श्यावारोकाभ्याम् विभाषा 145

5.4.145 अग्रान्त-शुद्ध-शुभ्र-वृष-वराहेभ्यश्च

5.4.146 ककुदस्यावस्थायां लोपः लोपः 149

5.4.147 त्रिककुत् पर्वते

5.4.148 उद्-विभ्यां काकुदस्य काकुदस्य 149

5.4.149 पूर्णाद् विभाषा

5.4.150 सुहृद्-दुर्हृदौ मित्रामित्रयोः
5.4.151 उरःप्रभृतिभ्यः कप् कप् 160
5.4.152 इनः स्त्रियाम्
5.4.153 नद्यृतश्च
5.4.154 शेषाद्विभाषा
5.4.155 न संज्ञायाम् न 160
5.4.156 ईयसश्च
5.4.157 वन्दिते भ्रातुः
5.4.158 ऋतश्छन्दसि
5.4.159 नाडी-तन्त्र्योः स्वाङ्गे
5.4.160 निष्प्रवाणिश्च

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे पञ्चमोऽध्यायः ॥

# अथ षष्ठोऽध्यायः

## अथ प्रथमः पादः

### (द्वित्व-प्रकरणम्)

6.1.1 एकाचो द्वे प्रथमस्य 11
6.1.2 अजादेर्द्वितीयस्य 11
6.1.3 न न्-द्-राःसंयोगादयः
(वा०) यथेष्टं नामधातुष्विति वक्तव्यम्
6.1.4 पूर्वोऽभ्यासः
6.1.5 उभे अभ्यस्तम् अभ्यस्तम् 6
6.1.6 जक्षित्यादयः षट्
6.1.7 तुजादीनां दीर्घोऽभ्यासस्य
6.1.8 लिटि धातोरनभ्यासस्य ध..स्य 11
6.1.9 सन्-यङोः
6.1.10 श्लौ
6.1.11 चङि
6.1.12 दाश्वान् साह्वान् मीढ्वांश्च

### (संप्रसारण-प्रकरणम्)

6.1.13 ष्यङः संप्रसारणं पुत्र-पत्योस्तत्पुरुषे
ष्यङः 14; संप्रसारणम् 31
6.1.14 बन्धुनि बहुव्रीहौ
6.1.15 वचि-स्वपि-यजादिनां किति किति 16
6.1.16 ग्रहि-ज्या-वयि-व्यधि-वष्टि-विचति-वृश्चति-पृच्छति-भृज्जतीनां ङिति च
6.1.17 लिट्यभ्यासस्योभयेषाम्
6.1.18 स्वापेश्चङि
6.1.19 स्वपि-स्यमि-व्येञां यङि यङि 21
6.1.20 न वशः
6.1.21 चायः की
6.1.22 स्फायः स्फी निष्ठायाम् निष्ठायाम् 28
6.1.23 स्त्यः प्रपूर्वस्य

6.1.24 द्रवमूर्ति-स्पर्शयोः श्यः श्यः 26

6.1.25 प्रतेश्च

6.1.26 विभाषाऽभ्यव-पूर्वस्य विभाषा 28

6.1.27 श्रृतं पाके

6.1.28 प्यायः पी 29

6.1.29 लिड्-यङोश्च लिड्यङोः 30

6.1.30 विभाषा श्वेः 31

6.1.31 णौ च संश्चङोः 32

6.1.32 ह्वः संप्रसारणम् ह्वः 34; संप्रसारणम् 36

6.1.33 अभ्यस्तस्य च

6.1.34 बहुलं छन्दसि बहुलम् 35; छन्दसि 36

6.1.35 चायः की

6.1.36 अपस्पृधेथामानृचुरानृहुश्चिच्युषे तित्याज श्राताः श्रितमाशीराशीर्त्ताः

6.1.37 न संप्रसारणे संप्रसारणम्
न संप्रसारणम् 44

6.1.38 लिटि वयो यः लिटि 40; वयो यः 39

6.1.39 वश्चास्यान्यतरस्यां किति

6.1.40 वेञः 41

6.1.41 ल्यपि च ल्यपि 44

6.1.42 ज्यश्च

6.1.43 व्यश्च व्यः 44

6.1.44 विभाषा परेः

**(आत्वादि-प्रकरणम्)**

6.1.45 आदेच उपदेशेऽशिति
आद्, एचः 57; उपदेशे 64

6.1.46 न व्यो लिटि

6.1.47 स्फुरति-स्फुलत्योर्घञि

6.1.48 क्रीङ्-जीनां णौ णौ 49

6.1.49 सिध्यतेरपारलौकिके

6.1.50 मीनाति-मिनोति-दीङां ल्यपि च
ल्यपि 51

(वा०) स्थाघ्वोरित्त्वे दीङः प्रतिषेधः

6.1.51 विभाषा लीयतेः विभाषा 56

6.1.52 खिदेश्छन्दसि

6.1.53 अपगुरो णमुलि

6.1.54 चि-स्फुरोर्णौ णौ 57

6.1.55 प्रजने वीयतेः

6.1.56 बिभेतेर्हेतुभये हेतुभये 57

6.1.57 नित्यं स्मयतेः

6.1.58 सृजि-दृशोर्झल्यमकिति झ..ति 59

6.1.59 अनुदात्तस्य चर्दुपधस्यान्यतरस्याम्

6.1.60 शीर्षंश्छन्दसि शीर्षन् 61

6.1.61 ये च तद्धिते

6.1.62 अचि शीर्षः

6.1.63 पद् दन् नो मास् हृन् निशसन् यूषन् दोषन् यकञ् छकन्नुदन्नासञ् छस्प्रभृतिषु

6.1.64 धात्वादेः षः सः धात्वादेः 65

6.1.65 णो नः

**(लोप-प्रकरणम्)**

6.1.66 लोपो व्योर्वलि लोपः 70

6.1.67 वेरपृक्तस्य

6.1.68 हल्-ङ्याब्भ्यो दीर्घात् सु-तिस्यपृक्तं हल्
हल् 69

6.1.69 एङ्-ह्रस्वात् सम्बुद्धेः

6.1.70 शेश्छन्दसि बहुलम्

**(तुगादि-प्रकरणम्)**

6.1.71 ह्रस्वस्य पिति कृति तुक्
ह्रस्वस्य 73; तुक् 76

(सन्धि-प्रकरणम्)

6.1.72 संहितायाम् 158

6.1.73 छे च छे 76

6.1.74 आङ्-माङोश्च

6.1.75 दीर्घात् 76

6.1.76 पदान्ताद्वा

6.1.77 इको यणचि अचि 125

6.1.78 एचोऽयवायावः एचः 83

6.1.79 वान्तो यि प्रत्यये

वान्तः 80; यि प्रत्यये 83

(वा०) गोर्यूतौ च्छन्दस्युपसङ्ख्यानम्

(वा०) अध्वपरिमाणे च

6.1.80 धातोस्तन्निमित्तस्यैव धातोः 83

6.1.81 क्षय्य-जय्यौ शक्यार्थे

6.1.82 क्रय्यस्तदर्थे

6.1.83 भय्य-प्रवय्ये च च्छन्दसि

(एकादेशादि-प्रकरणम्)

6.1.84 एकः पूर्वपरयोः 111

6.1.85 अन्तादिवच्च

6.1.86 षत्व-तुकोरसिद्धः

6.1.87 आद् गुणः आत् 96

6.1.88 वृद्धिरेचि वृद्धिः 92; एचि 89

6.1.89 एत्येधत्यूठ्सु

(वा०) अक्षादूहिन्यामुपसङ्ख्यानम्

(वा०) प्रादूहोढोढ्येषैष्येषु

(वा०) ऋते च तृतीया-समासे

(वा०) प्रवत्सतर-कम्बल-वसनार्ण-दशानामृणे

6.1.90 आटश्च

6.1.91 उपसर्गाद् ऋति धातौ

उपसर्गाद्, धातौ 94; ऋति 92

6.1.92 वा सुप्यापिशलेः

6.1.93 औतोऽम्-शसोः

6.1.94 एङि पररूपम् पररूपम् 100

(वा०) शकन्ध्वादिषु पररूपं वाच्यम्

6.1.95 ओमाङोश्च

6.1.96 उस्यपदान्तात् अपदान्तात् 97

6.1.97 अतो गुणे

6.1.98 अव्यक्तानुकरणस्यात इतौ

अव्य..स्य, अतः 100; इतौ 99

6.1.99 नाम्रेडितस्यान्त्यस्य तु वा

6.1.100 नित्यमाम्रेडिते डाचि

6.1.101 अकः सवर्णे दीर्घः

अकः 107; दीर्घः 106

(वा०) ऋति सवर्णे ऋ वा

(वा०) ऌति सवर्णे ऌ वा

6.1.102 प्रथमयोः पूर्वसवर्णः पूर्वसवर्णः 106

6.1.103 तस्माच्छसो नः पुंसि

6.1.104 नादिचि न 105; इचि 106

6.1.105 दीर्घाज्जसि च 106

6.1.106 वा च्छन्दसि 108

6.1.107 अमि पूर्वः पूर्वः 110

6.1.108 संप्रसारणाच्च

6.1.109 एङः पदान्तादति एङः 110; अति 113

6.1.110 ङसिङसोश्च ङसिङसोः 112

6.1.111 ऋत उत् उत् 112

6.1.112 ख्यत्यात् परस्य

6.1.113 अतो रोरप्लुतादप्लुते अतो..तात् 114

6.1.114 हशि च

**(प्रकृतिभावादि-प्रकरणम्)**

6.1.115 प्रकृत्याऽन्तःपादमव्यपरे
प्रकृत्या 130; अन्तःपादम् 116

6.1.116 अव्यादवद्यादवक्रमुरव्रतायमवन्त्व-वस्युषु च

6.1.117 यजुष्युरः यजुषि 121

6.1.118 आपो जुषाणो वृष्णो वर्षिष्ठेऽम्बे-ऽम्बाले-ऽम्बिकेपूर्वे

6.1.119 अङ्ग इत्यादौ च

6.1.120 अनुदात्ते च कु-धपरे अनुदात्ते 121

6.1.121 अवपथासि च

6.1.122 सर्वत्र विभाषा गोः
विभाषा 123; गोः 124

6.1.123 अवङ् स्फोटायनस्य अवङ् 124

6.1.124 इन्द्रे च

6.1.125 प्लुत-प्रगृह्या अचि नित्यम् अचि 130

6.1.126 आङोऽनुनासिकश्छन्दसि

6.1.127 इकोऽसवर्णे शाकल्यस्य ह्रस्वश्च
शाकल्यस्य ह्रस्वः च 128

(वा०) न समासे

6.1.128 ऋत्यकः

6.1.129 अप्लुतवदुपस्थिते अप्लुतवत् 130

6.1.130 ई३ चाक्रवर्मणस्य

6.1.131 दिव उत्

6.1.132 एतत्-तदोः सुलोपोऽकोरनञ्समासे हलि सुलोपः 134; हलि 133

6.1.133 स्यश्छन्दसि बहुलम्

6.1.134 सोऽचि लोपे चेत् पादपूरणम्

**(सुट्-प्रकरणम्)**

6.1.135 सुट् कात् पूर्वः 157

6.1.136 अडभ्यासव्यवायेऽपि

6.1.137 सम्पर्युपेभ्यः करोतौ भूषणे
सम्पर्युपेभ्यः 138; करोतौ 139

6.1.138 समवाये च

6.1.139 उपात् प्रतियत्न-वैकृत-वाक्याध्याहारेषु
उपात् 141

6.1.140 किरतौ लवने किरतौ 142

6.1.141 हिंसायां प्रतेश्च

6.1.142 अपाच्चतुष्पाच्छकुनिष्वालेखने

6.1.143 कुस्तुम्बुरूणि जातिः

6.1.144 अपरस्पराः क्रियासातत्ये

6.1.145 गोष्पदं सेवितासेवित-प्रमाणेषु

6.1.146 आस्पदं प्रतिष्ठायाम्

6.1.147 आश्चर्यमनित्ये

6.1.148 वर्चस्केऽवस्करः

6.1.149 अपस्करो रथाङ्गम्

6.1.150 विष्किरः शकुनौ वा

6.1.151 ह्रस्वाच्चन्द्रोत्तरपदे मन्त्रे

6.1.152 प्रतिष्कशश्च कशेः

6.1.153 प्रस्कण्व-हरिश्चन्द्रावृषी

6.1.154 मस्कर-मस्करिणौ वेणु-परिव्राजकयोः

6.1.155 कास्तीराजस्तुन्दे नगरे

6.1.156 कारस्करो वृक्षः

6.1.157 पारस्करप्रभृतीनि च संज्ञायाम्

**(स्वरप्रक्रिया)**

6.1.158 अनुदात्तं पदमेकवर्जम्

**(उदात्त-प्रकरणम्)**

6.1.159 कर्षात्वतो घञोऽन्त उदात्तः
अन्तः 185; उदात्तः 220

6.1.160 उञ्छादीनां च

6.1.161 अनुदात्तस्य च यत्रोदात्तलोपः
6.1.162 धातोः
6.1.163 चितः 164
6.1.164 तद्धितस्य 165
6.1.165 कितः
6.1.166 तिसृभ्यो जसः
6.1.167 चतुरः शसि
6.1.168 सावेकाचस्तृतीयादिर्विभक्तिः
एका..दिः 169; विभक्तिः 184
6.1.169 अन्तोदत्तादुत्तरपदादन्यतरस्याम-नित्यसमासे अन्तोदात्तात् 177
6.1.170 अञ्चेश्छन्दस्यसर्वनामस्थानम्
असर्वनामस्थानम् 175
6.1.171 ऊडिदम्-पदाद्यप्-पुं-रै-द्युभ्यः
6.1.172 अष्टनो दीर्घात्
6.1.173 शतुरनुमो नद्यजादी नद्यजादी 175
6.1.174 उदात्तयणो हल्पूर्वात् 175
6.1.175 नोङ्-धात्वोः
6.1.176 ह्रस्व-नुड्भ्यां मतुप् ह्रस्वः, मतुप् 177
6.1.177 नामन्यतरस्याम् 187
6.1.178 ङ्याश्छन्दसि बहुलम्
6.1.179 षट्-त्रि-चतुर्भ्यो हलादिः
षट्त्रिचतुर्भ्यः 181
6.1.180 झल्युपोत्तमम् 181
6.1.181 विभाषा भाषायाम्
6.1.182 न गो-श्वन्-साववर्ण-राडङ्-क्रुङ्-कृद्भ्यः न 184
6.1.183 दिवो झल् झल् 184
6.1.184 नृ चान्यतरस्याम्
6.1.185 तित् स्वरितम्
6.1.186 तास्यनुदात्तेन्ङिददुपदेशाल्लसार्व-धातुकमनुदात्तमह्न्विङोः
लसार्वधातुकम् 192
6.1.187 आदिः सिचोऽन्यतरस्याम्
आदिः, अन्यतरस्याम् 188
6.1.188 स्वपादिर्हिंसामच्यनिटि
अचि, अनिटि 189
6.1.189 अभ्यस्तानामादिः
अभ्यस्तानाम् 192; आदिः 191
6.1.190 अनुदात्ते च
6.1.191 सर्वस्य सुपि
6.1.192 भी-ह्री-भृ-हु-मद्-जन-धन-दरिद्रा-जागरां प्रत्ययात् पूर्वं पिति
प्रत्ययात् पूर्वम् 193
6.1.193 लिति
6.1.194 आदिर्णमुल्यन्यतरस्याम्
आदिः, अन्यतरस्याम् 196
6.1.195 अचः कर्तृयकि
6.1.196 थलि च सेटीडन्तो वा
6.1.197 ञ्नित्यादिर्नित्यम् आदिः 216
6.1.198 आमन्त्रितस्य च
6.1.199 पथि-मथोः सर्वनामस्थाने
6.1.200 अन्तश्च तवै युगपत्
6.1.201 क्षयो निवासे
6.1.202 जयः करणम्
6.1.203 वृषादीनां च
6.1.204 संज्ञायामुपमानम् संज्ञायाम् 205
6.1.205 निष्ठा च द्व्यजनात्
6.1.206 शुष्क-धृष्टौ
6.1.207 आशितः कर्ता

6.1.208 रिक्ते विभाषा विभाषा 209

6.1.209 जुष्टार्पिते च च्छन्दसि जुष्टार्पिते 210

6.1.210 नित्यं मन्त्रे

6.1.211 युष्मदस्मदोर्ङसि युष्मदस्मदोः 212

6.1.212 ङयि च

6.1.213 यतोऽनावः

6.1.214 ईड-वन्द-वृ-शंस-दुहां ण्यतः

6.1.215 विभाषा वेण्विन्धानयोः विभाषा 216

6.1.216 त्याग-राग-हास-कुह-श्वठ-क्रथानाम्

6.1.217 उपोत्तमं रिति उपोत्तमम् 218

6.1.218 चङ्यन्यतरस्याम्

6.1.219 मतोः पूर्वमात् संज्ञायां स्त्रियाम् संज्ञायाम् 221

6.1.220 अन्तोऽवत्याः अन्तः 223

6.1.221 ईवत्याः

6.1.222 चौ

6.1.223 समासस्य

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठाध्यायस्य प्रथमः पादः ॥

## अथ षष्ठाध्यायस्य द्वितीयः पादः

**(समासस्वरे पूर्वपदप्रकृतिभावः)**

6.2.1 बहुव्रीहौ प्रकृत्या पूर्वपदम् प्रकृत्या 63; पूर्वपदम् 110

6.2.2 तत्पुरुषे तुल्यार्थ-तृतीया-सप्तम्युपमानाव्यय-द्वितीया-कृत्याः तत्पुरुषे 24

6.2.3 वर्णः वर्णेष्वनेते

6.2.4 गाध-लवणयोः प्रमाणे

6.2.5 दायाद्यं दायादे

6.2.6 प्रतिबन्धि चिर-कृच्छ्रयोः

6.2.7 पदेऽपदेशे

6.2.8 निवाते वातत्राणे

6.2.9 शारदेनार्तवे

6.2.10 अध्वर्यु-कषाययोर्जातौ

6.2.11 सदृश-प्रतिरूपयोः सादृश्ये

6.2.12 द्विगौ प्रमाणे

6.2.13 गन्तव्य-पण्यं वाणिजे

6.2.14 मात्रोपज्ञोपक्रम-च्छाये नपुंसके

6.2.15 सुख-प्रिययोर्हिते सुखप्रिययोः 16

6.2.16 प्रीतौ च

6.2.17 स्वं स्वामिनि

6.2.18 पत्यावैश्वर्ये 20

6.2.19 न भू-वाक्-चिद्-दिधिषु

6.2.20 वा भुवनम्

6.2.21 आशङ्काबाध-नेदीयस्सु संभावने

6.2.22 पूर्वे भूतपूर्वे

6.2.23 सविध-सनीड-समर्याद-सवेश-सदेशेषु सामीप्ये

6.2.24 विस्पष्टादीनि गुणवचनेषु

6.2.25 श्र-ज्या-वमकन्-पापवत्सु भावे कर्मधारये कर्मधारये 28

6.2.26 कुमारश्च कुमारः 28

6.2.27 आदिः प्रत्येनसि    आदिः 28

6.2.28 पूगेष्वन्यतरस्याम्

6.2.29 इगन्त-काल-कपाल-भगाल-शरावेषु द्विगौ    इ..षु 30; द्विगौ 31

6.2.30 बह्वन्यतरस्याम्    अन्यतरस्याम् 31

6.2.31 दिष्टि-वितस्त्योश्च

6.2.32 सप्तमी सिद्ध-शुष्क-पक्व-बन्धेष्वकालात्

6.2.33 परि-प्रत्युपापा वर्ज्यमानाहोरात्रावयवेषु

6.2.34 राजन्य-बहुवचन-द्वन्द्वेऽन्धकवृष्णिषु    द्वन्द्वे 37

6.2.35 सङ्ख्या

6.2.36 आचार्योपसर्जनश्चान्तेवासी

6.2.37 कार्तकौजपादयश्च

6.2.38 महान् व्रीह्यपराह्ण-गृष्टीष्वास-जाबाल-भार-भारत-हैलिहिल-रौरव-प्रवृद्धेषु    महान् 39

6.2.39 क्षुल्लकश्च वैश्वदेवे

6.2.40 उष्ट्रः सादि-वाम्योः

6.2.41 गौः साद-सादि-सारथिषु

6.2.42 कुरुगार्हपत रिक्तगुर्वसूतजरत्यश्लील-दृढरूपा पारेवडवा तैतिलकद्रूः पण्यकम्बलो दासीभाराणां च

6.2.43 चतुर्थी तदर्थे    चतुर्थी 45

6.2.44 अर्थे

6.2.45 क्ते च    क्ते 49

6.2.46 कर्मधारयेऽनिष्ठा

6.2.47 अहीने द्वितीया

6.2.48 तृतीया कर्मणि    कर्मणि 49

6.2.49 गतिरनन्तरः    गतिः 52; अनन्तरः 51

6.2.50 तादौ च निति कृत्यतौ

6.2.51 तवै चान्तश्च युगपत्

6.2.52 अनिगन्तोऽञ्चतौ वप्रत्यये    अञ्चतौ वप्रत्यये 53

6.2.53 न्यधी च

6.2.54 ईषदन्यतरस्याम्    अन्यतरस्याम् 63

6.2.55 हिरण्यपरिमाणं धने

6.2.56 प्रथमोऽचिरोपसम्पत्तौ

6.2.57 कतर-कतमौ कर्मधारये    कर्मधारये 59

6.2.58 आर्यो ब्राह्मण-कुमारयोः    ब्र..योः 59

6.2.59 राजा च    राजा 60

6.2.60 षष्ठी प्रत्येनसि

6.2.61 क्ते नित्यार्थे

6.2.62 ग्रामः शिल्पिनि    शिल्पिनि 63

6.2.63 राजा च प्रशंसायाम्

**(समासस्वरे पूर्वपदाद्युदात्त-प्रकरणम्)**

6.2.64 आदिरुदात्तः    आदिः 91; उदात्तः 199

6.2.65 सप्तमी-हारिणौ धर्म्येऽहरणे

6.2.66 युक्ते च

6.2.67 विभाषाऽध्यक्षे    विभाषा 68

6.2.68 पापं च शिल्पिनि

6.2.69 गोत्रान्तेवासि-माणव-ब्राह्मणेषु क्षेपे

6.2.70 अङ्गानि मैरेये

6.2.71 भक्ताख्यास्तदर्थेषु

6.2.72 गो-बिडाल-सिंह-सैन्धवेषूपमाने

6.2.73 अके जीविकाऽर्थे    अके 74

6.2.74 प्राचां क्रीडायाम्

6.2.75 अणि नियुक्ते    अणि 77

6.2.76 शिल्पिनि चाकृञः    अकृञः 77

6.2.77 संज्ञायां च
6.2.78 गो-तन्ति-यवं पाले
6.2.79 णिनि 80
6.2.80 उपमानं शब्दार्थप्रकृतावेव
6.2.81 युक्तारोह्यादयश्च
6.2.82 दीर्घ-काश-तुष-भ्राष्ट्र-वटं जे जे 83
6.2.83 अन्त्यात् पूर्वं बह्वचः
6.2.84 ग्रामेऽनिवसन्तः
6.2.85 घोषादिषु च
6.2.86 छात्र्यादयः शालायाम्
6.2.87 प्रस्थेऽवृद्धमकर्क्यादीनाम् प्रस्थे 88
6.2.88 मालादीनां च
6.2.89 अमहन्नवं नगरेऽनुदीचाम्
अमहन्नवं 90
6.2.90 अर्मे चावर्णं द्व्यच् त्र्यच् अर्मे 91
6.2.91 न भूताधिक-संजीव-मद्राश्म-कज्जलम्

**(समासस्वरे पूर्वपदान्तोदात्त-प्रकरणम्)**

6.2.92 अन्तः 110
6.2.93 सर्वं गुणकार्त्स्न्ये
6.2.94 संज्ञायां गिरि-निकाययोः
6.2.95 कुमार्यां वयसि
6.2.96 उदकेऽकेवले
6.2.97 द्विगौ क्रतौ
6.2.98 सभायां नपुंसके
6.2.99 पुरे प्राचाम् पुरे 91
6.2.100 अरिष्ट-गौड-पूर्वे च
6.2.101 न हास्तिन-फलक-मार्देयाः
6.2.102 कुसूल-कूप-कुम्भ-शालं बिले
6.2.103 दिक्छब्दा ग्राम-जनपदाख्यान-चानराटेषु दिक्छब्दाः 105
6.2.104 आचार्योपसर्जनश्चान्तेवासिनि
6.2.105 उत्तरपदवृद्धौ सर्वं च
6.2.106 बहुव्रीहौ विश्वं संज्ञयाम्
बहुव्रीहौ 120; संज्ञयाम् 108
6.2.107 उदराश्वेषुषु 108
6.2.108 क्षेपे
6.2.109 नदी बन्धुनि
6.2.110 निष्ठोपसर्गपूर्वमन्यतरस्याम्

**(समासस्वरे उत्तरपदाद्युदात्त-प्रकरणम्)**

6.2.111 उत्तरपदादिः
उत्तरपदस्य 199; अदिः 136
6.2.112 कर्णो वर्णलक्षणात् कर्णः 113
6.2.113 संज्ञौपम्ययोश्च 115
6.2.114 कण्ठ-पृष्ठ-ग्रीवा-जङ्घं च
6.2.115 शृङ्गमवस्थायां च
6.2.116 नञो जर-मर-मित्र-मृताः
6.2.117 सोर्मनसी अ-लोमोषसी सोः 120
6.2.118 क्रत्वादयश्च
6.2.119 आद्युदात्तं द्व्यच् छन्दसि छन्दसि 120
6.2.120 वीर-वीर्यौ च
6.2.121 कूल-तीर-तूल-मूल-शालाक्ष-सममव्ययीभावे
6.2.122 कंस-मन्थ-शूर्प-पाय्य-काण्डं द्विगौ
6.2.123 तत्पुरुषे शालायां नपुंसके
तत्पुरुषे 139; नपुंसके 125
6.2.124 कन्था च कन्था 125
6.2.125 आदिश्चिहणादीनाम्
6.2.126 चेल-खेट-कटुक-काण्डं गर्हायाम्

6.2.127 चीरमुपमानम्
6.2.128 पलल-सूप-शाकं मिश्रे
6.2.129 कूल-सूद-स्थल-कर्षाः संज्ञायाम्
6.2.130 अकर्मधारये राज्यम् अ..ये 131
6.2.131 वर्ग्यादयश्च
6.2.132 पुत्रः पुंभ्यः पुत्रः 133
6.2.133 नाचार्य-राजर्त्विक्-संयुक्त-ज्ञात्याख्येभ्यः
6.2.134 चूर्णादीन्यप्राणिषष्ठ्याः
अप्राणिषष्ठ्याः 135
6.2.135 षट् च काण्डादीनि
6.2.136 कुण्डं वनम्

**(समासस्वरे उत्तरपदप्रकृतिभावः)**

6.2.137 प्रकृत्या भगालम् प्रकृत्या 142
6.2.138 शितेर्नित्याबह्वज्बहुव्रीहावभसत्
6.2.139 गति-कारकोपपदात् कृत्
6.2.140 उभे वनस्पत्यादिषु युगपत्
उभे, युगपत् 142
6.2.141 देवताद्वन्द्वे च देवताद्वन्द्वे 142
6.2.142 नोत्तरपदेऽनुदात्तादावपृथिवी-रुद्र-पूषमन्थिषु

**(समासस्वरे उत्तरपदान्तोदात्त-प्रकरणम्)**

6.2.143 अन्तः 198
6.2.144 थाथ-घञ्-क्ताजबित्र-काणाम्
6.2.145 सूपमानात् क्तः क्तः 149
6.2.146 संज्ञायामनाचितादीनाम्
संज्ञायाम् 148
6.2.147 प्रवृद्धादीनां च
6.2.148 कारकाद्दत्त-श्रुतयोरेवाशिषि
कारकात् 151
6.2.149 इत्थम्भूतेन कृतमिति च
6.2.150 अनो भाव-कर्मवचनः
6.2.151 मन्-क्तिन्-व्याख्यान-शयनासन-स्थान-याजकादि-क्रीताः
6.2.152 सप्तम्याः पुण्यम्
6.2.153 ऊनार्थ-कलहं तृतीयायाः तृ..याः 154
6.2.154 मिश्रं चानुपसर्गमसन्धौ
6.2.155 नञो गुणप्रतिषेधे सम्पाद्यर्ह-हितालमर्थास्तद्धिताः
नञः 161; गु..धे, तद्धिताः 156
6.2.156 य-यतोश्चातदर्थे
6.2.157 अच्-कावशक्तौ अच्कौ 158
6.2.158 आक्रोशे च आक्रोशे 159
6.2.159 संज्ञायाम्
6.2.160 कृत्योकेष्णुच्-चार्वादयश्च
6.2.161 विभाषा तृन्नन्न-तीक्ष्ण-शुचिषु
6.2.162 बहुव्रीहाविदमेतत्-तद्भ्यः प्रथम-पूरणयोः क्रियागणने बहुव्रीहौ 177
6.2.163 सङ्ख्यायाः स्तनः 164
6.2.164 विभाषा छन्दसि
6.2.165 संज्ञायां मित्राजिनयोः
6.2.166 व्यवायिनोऽन्तरम्
6.2.167 मुखं स्वाङ्गम् 169
6.2.168 नाव्यय-दिक्छब्द-गो-महत्-स्थूल-मुष्टि-पृथु-वत्सेभ्यः
6.2.169 निष्ठोपमानादन्यतरस्याम्
6.2.170 जाति-काल-सुखादिभ्योऽनाच्छादनात् क्तोऽकृत-मितप्रतिपन्नाः जा..भ्यः 171
6.2.171 वा जाते

6.2.172 नञ्-सुभ्याम् 174

6.2.173 कपि पूर्वम् कपि 174

6.2.174 ह्रस्वान्तेऽन्त्यात् पूर्वम्

6.2.175 बहोर्नञ्वदुत्तरपदभूम्नि बहोः 176

6.2.176 न गुणादयोऽवयवाः

6.2.177 उपसर्गात् स्वाङ्गं ध्रुवमपर्शु
उपसर्गात् 195

6.2.178 वनं समासे वनम् 179

6.2.179 अन्तः

6.2.180 अन्तश्च अन्तः 181

6.2.181 न नि-विभ्याम्

6.2.182 परेरभितोभावि मण्डलम्

6.2.183 प्रादस्वाङ्गं संज्ञायाम्

6.2.184 निरुदकादीनि च

6.2.185 अभेर्मुखम् मुखम् 186

6.2.186 अपाच्च अपात् 187

6.2.187 स्फिग-पूत-वीणाऽञ्जोऽध्व-कुक्षि-सीरनाम-नाम च

6.2.188 अधेरुपरिस्थम्

6.2.189 अनोरप्रधान-कनीयसी अनोः 190

6.2.190 पुरुषश्चान्वादिष्टः

6.2.191 अतेरकृत्पदे

6.2.192 नेरनिधाने

6.2.193 प्रतेरंश्वादयस्तत्पुरुषे तत्पुरुषे 196

6.2.194 उपाद् द्व्यजजिनमगौरादयः

6.2.195 सोरवक्षेपणे

6.2.196 विभाषोत्पुच्छे विभाषा 198

6.2.197 द्वि-त्रिभ्यां पाद्-दन्-मूर्धसु बहुव्रीहौ

6.2.198 सक्थं चाक्रान्तात्

6.2.199 परादिश्छन्दसि बहुलम्

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठाध्यायस्य द्वितीयः पादः ॥

## अथ षष्ठाध्यायस्य तृतीयः पादः

**(अलुक्समासादि-प्रकरणम्)**

6.3.1 अलुगुत्तरपदे अलुक् 24; उत्तरपदे 139

6.3.2 पञ्चम्याः स्तोकादिभ्यः

6.3.3 ओजः-सहोऽम्भस्तमसस्तृतीयायाः
तृतीयायाः 6

6.3.4 मनसः संज्ञायाम् मनसः 5

6.3.5 आज्ञायिनि च

6.3.6 आत्मनश्च आत्मनः 7

6.3.7 वैयाकरणाख्यायां चतुर्थ्याः 8

6.3.8 परस्य च

6.3.9 हलदन्तात् सप्तम्याः संज्ञायाम्
हलदन्तात् 18; सप्तम्याः 20

6.3.10 कारनाम्नि च प्राचां हलादौ

6.3.11 मध्याद् गुरौ

(वा०) अन्ताच्च

6.3.12 अमूर्ध-मस्तकात् स्वाङ्गादकामे

6.3.13 बन्धे च विभाषा

6.3.14 तत्पुरुषे कृति बहुलम्

6.3.15 प्रावृट्-छरत्-काल-दिवां जे जे 16

6.3.16 विभाषा वर्ष-क्षर-शर-वरात् विभाषा 18

6.3.17 घ-काल-तनेषु कालनाम्नः

6.3.18 शय-वास-वासिष्वकालात्

6.3.19 नेन्सिद्ध-बध्नातिषु च न 20

6.3.20 स्थे च भाषायाम्

6.3.21 षष्ठ्या आक्रोशे षष्ठ्याः 24; आक्रोशे 22

6.3.22 पुत्रेऽन्यतरस्याम् पुत्रे 25

6.3.23 ऋतो विद्या-योनिसम्बन्धेभ्यः ऋतः 24; वि..भ्यः 25

6.3.24 विभाषा स्वसृ-पत्योः

6.3.25 आनङ् ऋतो द्वन्द्वे आनङ् 26

6.3.26 देवताद्वन्द्वे च देवताद्वन्द्वे 31

6.3.27 ईदग्नेः सोम-वरुणयोः अग्नेः 28

6.3.28 इद् वृद्धौ

6.3.29 दिवो द्यावा 30

6.3.30 दिवसश्च पृथिव्याम्

6.3.31 उषासोषसः

6.3.32 मातर-पितरावुदीचाम्

6.3.33 पितरा-मातरा च च्छन्दसि

**(पुंवद्भावादि-प्रकरणम्)**

6.3.34 स्त्रियाः पुंवद् भाषितपुंस्कादनूङ् समानाधिकरणे स्त्रियामपूरणी-प्रियादिषु स्त्रियाः, अनूङ् 42; पुंवत् 41; भाषितपुंस्कात् 43

6.3.35 तसिलादिष्वाकृत्वसुचः

(वा०) भस्याढे तद्धिते

6.3.36 क्यङ्-मानिनोश्च

6.3.37 न कोपधायाः न 41

6.3.38 संज्ञा-पूरण्योश्च

6.3.39 वृद्धिनिमित्तस्य च तद्धितस्यारक्तविकारे

6.3.40 स्वाङ्गाच्चेतः

6.3.41 जातेश्च

6.3.42 पुंवत् कर्मधारय-जातीय-देशीयेषु

(वा०) कुक्कुट्यादीनामण्डादिषु

6.3.43 घ-रूप-कल्प-चेलड्-ब्रुव-गोत्र-मत-हतेषु ङ्योऽनेकाचो ह्रस्वः घ..षु, ह्रस्वः 45

6.3.44 नद्याः शेषस्यान्यतरस्याम् नद्याः, अन्यतरस्याम् 45

6.3.45 उगितश्च

6.3.46 आन्महतः समानाधिकरणजातीययोः आत् 47

6.3.47 द्व्यष्टनः सङ्ख्यायामबहुव्रीह्यशीत्योः सं..त्योः 49

6.3.48 त्रेस्त्रयः

6.3.49 विभाषा चत्वारिंशत्प्रभृतौ सर्वेषाम्

**(हृदाद्यादेश-प्रकरणम्)**

6.3.50 हृदयस्य हृल्लेख-यदण्-लासेषु हृदयस्य हृत् 51

6.3.51 वा शोक-ष्यञ्-रोगेषु

6.3.52 पादस्य पदाज्याति-गोपहतेषु पादस्य 56

6.3.53 पद् यत्यतदर्थे पद् 56

6.3.54 हिम-काषि-हतिषु च

6.3.55 ऋचः शे

6.3.56 वा घोष-मिश्र-शब्देषु

6.3.57 उदकस्योदः संज्ञायाम् उ..दः 60

6.3.58 पेषं-वास-वाहन-धिषु च

6.3.59 एकहलादौ पूरयितव्येऽन्यतरस्याम्

अन्यतरस्याम् 61

6.3.60 मन्थौदन-सक्तु-बिन्दु-वज्र-भार-हार-वीवध-गाहेषु च

(ह्रस्व-प्रकरणम्)

6.3.61 इको ह्रस्वोऽङ्यो गालवस्य ह्रस्वः 66

(वा०) इयङुवङ्भाविनामव्ययानां च न भवति

6.3.62 एक तद्धिते च

6.3.63 ङ्यापोः संज्ञा-छन्दसोर्बहुलम्

ङ्यापोः, बहुलम् 64

6.3.64 त्वे च

6.3.65 इष्टकेषीका-मालानां चित-तूल-भारिषु

6.3.66 खित्यनव्ययस्य खिति 69; अन..स्य 67

(मुमादि-प्रकरणम्)

6.3.67 अरुर्द्विषदजन्तस्य मुम् मुम् 72

6.3.68 इच एकाचोऽम्प्रत्ययवच्च

6.3.69 वाचंयम-पुरन्दरौ च

6.3.70 कारे सत्यागदस्य

6.3.71 श्येन-तिलस्य पाते ञे

6.3.72 रात्रेः कृति विभाषा

6.3.73 न-लोपो नञः नञः 77

(वा०) नञो नलोपोऽवक्षेपे तिङ्युपसङ्ख्यानं कर्तव्यम्

6.3.74 तस्मान्नुडचि

6.3.75 नभ्राण्-नपान्नवेदा-नासत्या-नमुचि-नकुल-नख-नपुंसक-नक्षत्र-नक्र-नाकेषु प्रकृत्या प्रकृत्या 77

6.3.76 एकादिश्चैकस्य चादुक्

6.3.77 नगोऽप्राणिष्वन्यतरस्याम्

(साद्यादेश-प्रकरणम्)

6.3.78 सहस्य सः संज्ञायाम्

सहस्य 83; सः 89

6.3.79 ग्रन्थान्ताधिके च

6.3.80 द्वितीये चानुपाख्ये

6.3.81 अव्ययीभावे चाकाले

6.3.82 वोपसर्जनस्य

6.3.83 प्रकृत्याशिषि

6.3.84 समानस्य च्छन्दस्यमूर्द्ध-प्रभृत्युदर्केषु

समानस्य 89

6.3.85 ज्योतिर्जनपद-रात्रि-नाभि-नाम-गोत्र-रूप-स्थान-वर्ण-वयो-वचन-बन्धुषु

6.3.86 चरणे ब्रह्मचारिणि

6.3.87 तीर्थे ये ये 88

6.3.88 विभाषोदरे

6.3.89 दृग्-दृश-वतुषु 91

6.3.90 इदं-किमोरीश्-की

6.3.91 आ सर्वनाम्नः सर्वनाम्नः 92

6.3.92 विष्वग्-देवयोश्च टेरद्र्यञ्चतावप्रत्यये

अञ्चतौ अप्रत्यये 95

6.3.93 समः समि

6.3.94 तिरसस्तिर्यलोपे

6.3.95 सहस्य सध्रिः सहस्य 96

6.3.96 सध माद-स्थयोश्छन्दसि

6.3.97 द्व्यन्तरुपसर्गेभ्योऽप ईत् अपः 98

6.3.98 ऊदनोर्देशे

6.3.99 अषष्ठ्यतृतीयास्थस्यान्यस्य दुगाशीराशास्थास्थितोत्सुकोति-कारक-राग-च्छेषु अष..दुक् 100

6.3.100 अर्थे विभाषा

6.3.101 कोः कत् तत्पुरुषेऽचि
कोः 108; कत् 103
6.3.102 रथ-वदयोश्च
6.3.103 तृणे च जातौ
6.3.104 का पथ्यक्षयोः का 108
6.3.105 ईषदर्थे
6.3.106 विभाषा पुरुषे विभाषा 108
6.3.107 कवं चोष्णे कवम् 108
6.3.108 पथि च च्छन्दसि
6.3.109 पृषोदरादीनि यथोपदिष्टम्
6.3.110 सङ्ख्या-वि-सायपूर्वस्याह्नस्याहन्न-न्यतरस्यां ङौ

**(दीर्घ-प्रकरणम्)**

6.3.111 ढ्रलोपे पूर्वस्य दीर्घोऽणः ढ्रलोपे 112; पूर्वस्य 138; दीर्घः 6.4.18; अणः 6.4.2
6.3.112 सहि-वहोरोदवर्णस्य
6.3.113 साढ्यै साढ्वा साढेति निगमे
6.3.114 संहितायाम् 135
6.3.115 कर्णे लक्षणस्याविष्टाष्ट-पञ्च-मणि-भिन्न-छिन्न-च्छिद्र-स्रुव-स्वस्तिकस्य
6.3.116 नहि-वृति-वृषि-व्यधि-रुचि-सहि-तनिषु क्वौ
6.3.117 वन-गिर्योः संज्ञायां कोटर-किंशुलकादीनाम् संज्ञायाम् 120
6.3.118 वले
6.3.119 मतौ बह्वचोऽनजिरादीनाम् मतौ 120
6.3.120 शरादीनां च
6.3.121 इको वहेऽपीलोः
6.3.122 उपसर्गस्य घञ्यमनुष्ये बहुलम्
उपसर्गस्य 124
6.3.123 इकः काशे इकः 124
6.3.124 दस्ति
6.3.125 अष्टनः संज्ञायाम् अष्टनः 126
6.3.126 छन्दसि च
6.3.127 चितेः कपि
6.3.128 विश्वस्य वसु-राटोः विश्वस्य 130
6.3.129 नरे संज्ञायाम्
6.3.130 मित्रे चर्षौ
6.3.131 मन्त्रे सोमाश्वेन्द्रिय-विश्वदेव्यस्य मतौ
मन्त्रे 132
6.3.132 ओषधेश्च विभक्तावप्रथमायाम्
6.3.133 ऋचि तु-नु-घ-मक्षु-तङ्-कुत्रोरुष्या-णाम् ऋचि 136
6.3.134 इकः सुञि
6.3.135 द्व्यचोऽतस्तिङः
6.3.136 निपातस्य च
6.3.137 अन्येषामपि दृश्यते
6.3.138 चौ
6.3.139 संप्रसारणस्य 6.4.2

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठाध्यायस्य तृतीयः पादः ॥

# अथ षष्ठाध्यायस्य चतुर्थः पादः

(अङ्गाधिकारः)

6.4.1 अङ्गस्य 7.4.97

6.4.2 हलः

6.4.3 नामि 7

6.4.4 न तिसृ-चतसृ

6.4.5 छन्दस्युभयथा उभयथा 6

6.4.6 नृ च

6.4.7 नोपधायाः न 10; उपधायाः 18

6.4.8 सर्वनामस्थाने चासम्बुद्धौ
सर्वनामस्थाने 11; असम्बुद्धौ 14

6.4.9 वा षपूर्वस्य निगमे

6.4.10 सान्त महतः संयोगस्य

6.4.11 अप्-तृन्-तृच्-स्वसृ-नप्तृ-नेष्टृ-त्वष्टृ-क्षत्तृ-होतृ-पोतृ-प्रशास्तृणाम्

6.4.12 इन्-हन्-पूषार्यम्णां शौ इ..णाम् 13

6.4.13 सौ च सौ 14

6.4.14 अत्वसन्तस्य चाधातोः

6.4.15 अनुनासिकस्य क्वि-झलोः क्ङिति
क्विझलोः 21; क्ङिति 19

6.4.16 अज्झन-गमां सनि सनि 17

6.4.17 तनोतेर्विभाषा विभाषा 18

6.4.18 क्रमश्च क्त्वि

6.4.19 च्छ्-वोः शूडनुनासिके च
च्छ्वोः, अनुनासिके 21; शूठ् 20

6.4.20 ज्वर-त्वर-स्रिव्यवि-मवामुपधायाश्च

6.4.21 राल्लोपः

(आभीयम्)

6.4.22 असिद्धवदत्राभात् 175

(वा०) वुग्युटावुवङ्यणोः सिद्धौ वक्तव्यौ

6.4.23 श्नान्नलोपः नलोपः 33

6.4.24 अनिदितां हल उपधायाः क्ङिति
उपधायाः 34

6.4.25 दंश-सञ्ज-स्वञ्जां शपि शपि 26

6.4.26 रञ्जेश्च रञ्जेः 27

6.4.27 घञि च भाव-करणयोः घञि 29

6.4.28 स्यदो जवे

6.4.29 अवोदैधौद्म-प्रश्रथ-हिमश्रथाः

6.4.30 नाञ्चेः पूजायाम् न 32

6.4.31 क्त्वि स्कन्दि-स्यन्दोः क्त्वि 32

6.4.32 जान्त-नशां विभाषा विभाषा 33

6.4.33 भञ्जेश्च चिणि

6.4.34 शास इदङ्-हलोः शासः 35

6.4.35 शा हौ हौ 36

6.4.36 हन्तेर्जः

6.4.37 अनुदात्तोपदेश-वनति-तनोत्यादीनाम-नुनासिक लोपो झलि क्ङिति
अ..दीनाम् 39; अनुनासिकलोपः 40

6.4.38 वा ल्यपि

6.4.39 न क्तिचि दीर्घश्च

6.4.40 गमः क्वौ

6.4.41 विड्-वनोरनुनासिकस्यात् आत् 45

6.4.42 जन-सन-खनां सञ्झलोः ज..नाम् 43

6.4.43 ये विभाषा विभाषा 44

6.4.44 तनोतेर्यकि

6.4.45 सनः क्तिचि लोपश्चास्यान्यतरस्याम्
6.4.46 आर्धधातुके 68
6.4.47 भ्रस्जो रोपधयो रमन्यतरस्याम्
6.4.48 अतो लोपः लोपः 54
6.4.49 यस्य हलः हलः 50
6.4.50 क्यस्य विभाषा
6.4.51 णेरनिटि णेः 57
6.4.52 निष्ठायां सेटि
6.4.53 जनिता मन्त्रे
6.4.54 शमिता यज्ञे
6.4.55 अयामन्ताल्वाय्येत्न्विष्णुषु अय् 57
6.4.56 ल्यपि लघुपूर्वात् ल्यपि 59
6.4.57 विभाषाऽऽपः
6.4.58 यु-प्लुवोर्दीर्घश्छन्दसि दीर्घः 61
6.4.59 क्षियः 61
6.4.60 निष्ठायामण्यदर्थे 61
6.4.61 वाऽऽक्रोश-दैन्ययोः
6.4.62 स्य-सिच्-सीयुट्-तासिषु भावकर्मणो-रुपदेशेऽज्झन-ग्रह-दृशां वा चिण्वद् इट् च
6.4.63 दीङो युडचि क्ङिति
अचि 64; क्ङिति 68
6.4.64 आतो लोप इटि च आतः 69
6.4.65 ईद् यति ईत् 66
6.4.66 घु-मा-स्था-गा-पा-जहाति-सां हलि
घु..साम् 69
6.4.67 एर्लिङि 68
6.4.68 वाऽन्यस्य संयोगादेः
6.4.69 न ल्यपि ल्यपि 70

6.4.70 मयतेरिदन्यतरस्याम्
6.4.71 लुङ्-लङ्-लृङ्क्ष्वडुदात्तः 75
6.4.72 आडजादीनाम् आट् 75
6.4.73 छन्दस्यपि दृश्यते
6.4.74 न माङ्योगे 75
6.4.75 बहुलं छन्दस्यमाङ्योगेऽपि
बहुलं छन्दसि 76
6.4.76 इरयो रे
6.4.77 अचि श्नु-धातु-भ्रुवां य्वोरियङुवङौ
अचि 100; य्वोः 78; इयङुवङौ 80
6.4.78 अभ्यासस्यासवर्णे
6.4.79 स्त्रियाः 80
6.4.80 वाऽम्-शसोः
6.4.81 इणो यण् यण् 87
6.4.82 एरनेकाचोऽसंयोगपूर्वस्य 87
(वा०) गतिकारकेतरपूर्वपदस्य यण् नेष्यते
6.4.83 ओः सुपि सुपि 85
6.4.84 वर्षाभ्वश्च
(वा०) दृन्करपुनःपूर्वस्य भुवो यण् वक्तव्यः
6.4.85 न भू-सुधियोः भूसुधियोः 86
6.4.86 छन्दस्युभयथा
6.4.87 हु-श्नुवोः सार्वधातुके
6.4.88 भुवो वुग् लुङ्-लिटोः
6.4.89 ऊदुपधाया गोहः
ऊत् 91; उपधायाः 100
6.4.90 दोषो णौ दोषः 91; णौ 94
6.4.91 वा चित्तविरागे
6.4.92 मितां ह्रस्वः मिताम् 93
6.4.93 चिण्-णमुलोर्दीर्घोऽन्यतरस्याम्
6.4.94 खचि ह्रस्वः ह्रस्वः 97

6.4.95 ह्लादो निष्ठायाम्
6.4.96 छादेर्घेऽद्व्युपसर्गस्य छादेः 97
6.4.97 इस्-मन्-त्रन्-क्विषु च
6.4.98 गम-हन-जन-खन-घसां लोपः क्ङित्यनङि लोपः 100; क्ङिति 126
6.4.99 तनि-पत्योश्छन्दसि छन्दसि 100
6.4.100 घसि-भसोर्हलि च हलि 101
6.4.101 हु-झल्भ्यो हेर्धिः हेर्धिः 103
6.4.102 श्रु-शृणु-पॄ-कृ-वृभ्यश्छन्दसि छन्दसि 103
6.4.103 अङितश्च
6.4.104 चिणो लुक् लुक् 106
6.4.105 अतो हेः हेः 106
6.4.106 उतश्च प्रत्ययादसंयोगपूर्वात् उतः, प्रत्ययात् 110; असंयोगपूर्वात् 107
6.4.107 लोपश्चास्यान्यतरस्यां म्वोः लोपः 109; म्वोः 108
6.4.108 नित्यं करोतेः नित्यम् 109; करोतेः 110
6.4.109 ये च
6.4.110 अत उत् सार्वधातुके सा..के 118
6.4.111 श्नसोरल्लोपः लोपः 112
6.4.112 श्नाभ्यस्तयोरातः श्नाभ्यस्तयोः 113; आतः 114
6.4.113 ई हल्यघोः हलि 116
6.4.114 इद् दरिद्रस्य इत् 116
6.4.115 भियोऽन्यतरस्याम् अ..म् 117
6.4.116 जहातेश्च जहातेः 118
6.4.117 आ च हौ
6.4.118 लोपो यि
6.4.119 घ्वसोरेद्धावभ्यासलोपश्च एत्, अभ्यासलोपश्च 126
6.4.120 अत एकहल्मध्येऽनादेशादेर्लिटि अतः, लिटि 126; एक..शादेः 121
6.4.121 थलि च सेटि 126
6.4.122 तॄ-फल-भज-त्रपश्च
6.4.123 राधो हिंसायाम्
6.4.124 वा जॄ-भ्रमु-त्रसाम् वा 125
6.4.125 फणां च सप्तानाम्
6.4.126 न शस-दद-वादि-गुणानाम्
6.4.127 अर्वणस्त्रसावनञः तृ 128
6.4.128 मघवा बहुलम्

(भाधिकारः)

6.4.129 भस्य 175
6.4.130 पादः पत्
6.4.131 वसोः संप्रसारणम् स..म् 133
6.4.132 वाह ऊठ्
6.4.133 श्व-युव-मघोनामतद्धिते
6.4.134 अल्लोपोऽनः अत् 138; लोपः 145; अनः 137
6.4.135 षपूर्व-हन्-धृतराज्ञामणि
6.4.136 विभाषा ङि-श्योः
6.4.137 न संयोगाद् व-मन्तात्
6.4.138 अचः 139
6.4.139 उद ईत्
6.4.140 आतो धातोः
6.4.141 मन्त्रेष्वाङ्यादेरात्मनः
6.4.142 ति विंशतेर्डिति डिति 143
6.4.143 टेः 145

6.4.144 नस्तद्धिते तद्धिते 149

(वा०) अव्ययानां भमात्रे टिलोपः

(वा०) अश्मनो विकारे टिलोपो वक्तव्यः

6.4.145 अह्नष्ट-खोरेव

6.4.146 ओर्गुणः ओः 147

6.4.147 ढे लोपोऽकद्रवाः लोपः 156

6.4.148 यस्येति च ईति 150

(वा०) औङः श्यां प्रतिषेधो वाच्यः

6.4.149 सूर्य-तिष्यागस्त्य-मत्स्यानां य उपधायाः यः 152; उपधायाः 150

(वा०) तिष्यपुष्ययोर्नक्षत्राणि यलोप इति वाच्यम्

(वा०) मत्स्यस्य ङ्यां यलोपः

(वा०) सूर्यागस्तययोश्छे च ङ्यां च

6.4.150 हलस्तद्धितस्य हलः 152

6.4.151 आपत्यस्य च तद्धितेऽनाति आपत्यस्य 152; तद्धिते 153

6.4.152 क्य-च्व्योश्च

6.4.153 बिल्वकादिभ्यश्छस्य लुक्

6.4.154 तुरिष्ठेमेयःसु इष्ठेमेयःसु 163

6.4.155 टेः

6.4.156 स्थूल-दूर-युव-ह्रस्व-क्षिप्र-क्षुद्राणां यणादिपरं पूर्वस्य च गुणः

6.4.157 प्रिय-स्थिर-स्फिरोरु-बहुल-गुरु-वृद्ध-तृप्र-दीर्घ-वृन्दारकाणां प्र-स्थ-स्फ-वर्-बंहि-गर्-वर्षि-त्रब्-द्राघि-वृन्दाः

6.4.158 बहोर्लोपो भू च बहोः बहोः, भू च बहोः 159

6.4.159 इष्ठस्य यिट् च

6.4.160 ज्यादादीयसः

6.4.161 र ऋतो हलादेर्लघोः रः, ऋतः 162

6.4.162 विभाषर्जोश्छन्दसि

6.4.163 प्रकृत्यैकाच् प्रकृत्या 170

6.4.164 इनण्यनपत्ये इन् 166; अणि 171

6.4.165 गाथि-विदथि-केशि-गणि-पणिनश्च

6.4.166 संयोगादिश्च

6.4.167 अन् 170

6.4.168 ये चाभाव-कर्मणोः

6.4.169 आत्माध्वानौ खे

6.4.170 न मपूर्वोऽपत्येऽवर्मणः

6.4.171 ब्राह्मो जातौ

6.4.172 कार्मस्ताच्छील्ये

6.4.173 औक्षमनपत्ये

6.4.174 दाण्डिनायन-हास्तिनायनाथर्वणिक-जैह्माशिनेय-वाशिनायनि-भ्रौणहत्य-धैवत्य-सारवैक्ष्वाक-मैत्रेय-हिरणमयानि

6.4.175 ऋत्व्य-वास्त्व्य-वास्त्व-माध्वी-हिरण्ययानि च्छन्दसि

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे षष्ठोऽध्यायः॥

# अथ सप्तमोऽध्यायः

## अथ प्रथमः पादः

### (प्रत्ययादेश-प्रकरणम्)

7.1.1 यु-वोरनाकौ
7.1.2 आयनेयीनीयियः फ-ढ-ख-छ-घां प्रत्ययादीनाम् प्रत्ययस्य 5
7.1.3 झोऽन्तः झः 8
7.1.4 अदभ्यस्तात् अत् 8
7.1.5 आत्मनेपदेष्वनतः
7.1.6 शीङो रुट् रुट् 8
7.1.7 वेत्तेर्विभाषा
7.1.8 बहुलं छन्दसि
7.1.9 अतो भिस ऐस् अतः 17; भिस ऐस् 11
7.1.10 बहुलं छन्दसि
7.1.11 नेदमदसोरकोः
7.1.12 टा-ङसि-ङसामिनात्-स्याः
7.1.13 ङेर्यः ङेः 14
7.1.14 सर्वनाम्नः स्मै सर्वनाम्नः 17
7.1.15 ङसि-ङ्योः स्मात्-स्मिनौ 16
7.1.16 पूर्वादिभ्यो नवभ्यो वा
7.1.17 जसः शी शी 19
7.1.18 औङ आपः औङः 19
7.1.19 नपुंसकाच्च नपुंसकात् 20
7.1.20 जश्शसोः शिः जश्शसोः 22
7.1.21 अष्टाभ्य औश्
7.1.22 षड्भ्यो लुक् लुक् 23
7.1.23 स्वमोर्नपुंसकात् स्वमोः 26; नपुंसकात् 24
7.1.24 अतोऽम्
7.1.25 अद्ड् डतरादिभ्यः पञ्चभ्यः अद्ड् 26
(वा०) एकतरात्प्रतिषेधो वक्तव्यः
7.1.26 नेतराच्छन्दसि
7.1.27 युष्मदस्मद्भ्यां ङसोऽश् यु..भ्याम् 33
7.1.28 ङे प्रथमयोरम्
7.1.29 शसो न
7.1.30 भ्यसोऽभ्यम् भ्यसः 31
7.1.31 पञ्चम्या अत् 32
7.1.32 एकवचनस्य च
7.1.33 साम आकम्
7.1.34 आत औ णलः
7.1.35 तु-ह्योस्तातङ्ङाशिष्यन्यतरस्याम् अन्यतरस्याम् 36
7.1.36 विदेः शतुर्वसुः
7.1.37 समासेऽनञ्पूर्वे क्त्वो ल्यप् 38
7.1.38 क्त्वाऽपि च्छन्दसि छन्दसि 50
7.1.39 सुपां सु-लुक्-पूर्वसवर्णाच्छे-या-डा-ड्या-याजालः
7.1.40 अमो मश्
7.1.41 लोपस्त आत्मनेपदेषु
7.1.42 ध्वमो ध्वात्
7.1.43 यजध्वैनमिति च
7.1.44 तस्य तात् तस्य 45
7.1.45 तप्-तनप्-तन-थनाश्च
7.1.46 इदन्तो मसि

7.1.47 क्त्वो यक् — त्त्वः 49

7.1.48 इष्ट्वीनमिति च

7.1.49 स्नात्व्यादयश्च

7.1.50 आज्जसेरसुक् — आत् 52; असुक् 51

7.1.51 अश्व-क्षीर-वृष-लवणानामात्मप्रीतौ क्यचि

7.1.52 आमि सर्वनाम्नः सुट् — आमि 57

7.1.53 त्रेस्त्रयः

7.1.54 ह्रस्व-नद्यापो नुट् — नुट् 57

(वा०) नुमचिरतृज्वद्भावेभ्यो नुट् पूर्वविप्रतिषेधेन

7.1.55 षट्-चतुर्भ्यश्च

7.1.56 श्री-ग्रामण्योश्छन्दसि — छन्दसि 57

7.1.57 गोः पादान्ते

**(नुम्-प्रकरणम्)**

7.1.58 इदितो नुम् धातोः — नुम् 83

7.1.59 शे मुचादीनाम्

(वा०) शे तृम्फादीनां नुम्वाच्यः

7.1.60 मस्जि-नशोर्झलि

(वा०) मस्जेरन्त्यात्पूर्वो नुम्वाच्यः

7.1.61 रधि-जभोरचि — अचि 64

7.1.62 नेट्यलिटि रधेः

7.1.63 रभेरशब्लिटोः — अशब्लिटोः 64

7.1.64 लभेश्च — लभेः 69

7.1.65 आङो यि — यि 66

7.1.66 उपात् प्रशंसायाम्

7.1.67 उपसर्गात् खल्-घञोः — 68

7.1.68 न सु-दुर्भ्यां केवलाभ्याम्

7.1.69 विभाषा चिण्-णमुलोः

7.1.70 उगिदचां सर्वनामस्थानेऽधातोः — सर्वनामस्थाने 72

7.1.71 युजेरसमासे

7.1.72 नपुंसकस्य झलचः — नपुंसकस्य 77

7.1.73 इकोऽचि विभक्तौ — इकः 74; अचि विभक्तौ 75

(वा०) वृद्ध्यौत्त्वतृज्वद्भावगुणेभ्यो नुम् पूर्वविप्रतिषेधन

7.1.74 तृतीयादिषु भाषितपुंस्कं पुंवद् गालवस्य — तृतीयादिषु 75

7.1.75 अस्थि-दधि-सक्थ्यक्ष्णामनङुदात्तः — अस्थि..क्ष्णाम्, उदात्तः 77; अनङ् 76

7.1.76 छन्दस्यपि दृश्यते — छन्दसि 77

7.1.77 ई च द्विवचने

7.1.78 नाभ्यस्ताच्छतुः — अभ्यस्तात् 79; शतुः 81

7.1.79 वा नपुंसकस्य — वा 80

7.1.80 आच्छी-नद्योर्नुम् — आच्छीनद्योः 81; नुम् 83

7.1.81 शप्-श्यनोर्नित्यम्

7.1.82 सावनडुहः — सौ 85

7.1.83 दृक्-स्ववस्-स्वतवसां छन्दसि

**(आदेश-प्रकरणम्)**

7.1.84 दिव औत्

7.1.85 पथि-मथ्यृभुक्षामात् — प..क्षाम् 88

7.1.86 इतोऽत् सर्वनामस्थाने — स..ने 98

7.1.87 थो न्थः

7.1.88 भस्य टेर्लोपः

7.1.89 पुंसोऽसुङ्

(वा०) अस्य संबुद्धौ वानङ्, नलोपश्च वा वाच्यः

7.1.90 गोतो णित् — णित् 92

7.1.91 णलुत्तमो वा

7.1.92 सख्युरसम्बुद्धौ सख्युः 93; असम्बुद्धौ 95

7.1.93 अनङ् सौ 94

7.1.94 ऋदुशनस्-पुरुदंसोऽनेहसां च

7.1.95 तृज्वत् क्रोष्टुः 97

7.1.96 स्त्रियां च

7.1.97 विभाषा तृतीयादिष्वचि

7.1.98 चतुरनडुहोरामुदात्तः च..होः 99

7.1.99 अम् सम्बुद्धौ

7.1.100 ॠत इद् धातोः
ॠतः, धातोः 103; इत् 101

7.1.101 उपधायाश्च

7.1.102 उदोष्ठ्यपूर्वस्य उत् 103

7.1.103 बहुलं छन्दसि

॥ इति अष्टाध्यायीसूत्रपाठे सप्तमाध्यायस्य प्रथमः पादः ॥

## अथ सप्तमाध्यायस्य द्वितीयः पादः

### (वृद्धि-प्रकरणम्)

7.2.1 सिचि वृद्धिः परस्मैपदेषु 7

7.2.2 अतो ल्रान्तस्य

7.2.3 वद-व्रज-हलन्तस्याचः ह..चः 4

7.2.4 नेटि 7

7.2.5 ह्म्यन्त-क्षण-श्वस-जागृ-णि-श्व्येदिताम्

7.2.6 ऊर्णोतेर्विभाषा विभाषा 7

7.2.7 अतो हलादेर्लघोः

### (अनिट्-प्रकरणम्)

7.2.8 नेड् वशि कृति नेट् 34; कृति 9

7.2.9 ति-तु-त्र-त-थ-सि-सु-सर-कसेषु च

7.2.10 एकाच उपदेशेऽनुदात्तात् एकाचः 11

7.2.11 श्र्युकः किति उकः 12

7.2.12 सनि ग्रह-गुहोश्च

7.2.13 कृ-सृ-भृ-वृ-स्तु-द्रु-स्रु-श्रुवो लिटि

7.2.14 श्वीदितो निष्ठायाम् निष्ठायाम् 34

7.2.15 यस्य विभाषा

7.2.16 आदितश्च आदितः 17

7.2.17 विभाषा भावादिकर्मणोः

7.2.18 क्षुब्ध-स्वान्त-ध्वान्त-लग्न-म्लिष्ट-विरिब्ध-फाण्ट-बाढानि मन्थ-मनस्तमः-सक्ताविस्पष्ट-स्वरानायास-भृशेषु

7.2.19 धृषि-शसी वैयात्ये

7.2.20 दृढः स्थूल-बलयोः

7.2.21 प्रभौ परिवृढः

7.2.22 कृच्छ्र-गहनयोः कषः

7.2.23 घुषिरविशब्दने

7.2.24 अर्देः सं-नि-विभ्यः अर्देः 25

7.2.25 अभेश्चाविदूर्ये

7.2.26 णेरध्ययने वृत्तम् णेः 27

7.2.27 वा दान्त-शान्त-पूर्ण-दस्त-स्पष्ट-च्छन्न-ज्ञप्ताः वा 30

7.2.28 रुष्यम-त्वर-संघुषास्वनाम्

7.2.29 हृषेर्लोमसु

7.2.30 अपचितश्च
7.2.31 ह्रु ह्वरेश्छन्दसि छन्दसि 34
7.2.32 अपरिह्वृताश्च
7.2.33 सोमे ह्वरितः
7.2.34 ग्रसित-स्कभित-स्तभितोत्तभित-चत्त-विकस्ता विशस्तृ-शंस्तृ-शास्तृ-तरुतृ-तरूतृ-वरुतृ-वरूतृ-वरूत्रीरुज्ज्वलिति-क्षरिति-क्षमिति-वमित्यमितीति च

**(इट्-प्रकरणम्)**

7.2.35 आर्धधातुकस्येड् वलादेः
आर्धधातुकस्य 75; इट्, वलादेः 78
7.2.36 स्नु-क्रमोरनात्मनेपदनिमित्ते
7.2.37 ग्रहोऽलिटि दीर्घः अलिटि 38; दीर्घः 40
7.2.38 वृतो वा वृतः 42
7.2.39 न लिङि न 40
7.2.40 सिचि च परस्मैपदेषु
7.2.41 इट् सनि वा वा 43
7.2.42 लिङ्-सिचोरात्मनेपदेषु 43
7.2.43 ऋतश्च संयोगादेः
7.2.44 स्वरति-सूति-सूयति-धूञूदितो वा
वा 51
7.2.45 रधादिभ्यश्च
7.2.46 निरः कुषः 47
7.2.47 इण् निष्ठायाम्
7.2.48 तीष-सह-लुभ-रुष-रिषः
7.2.49 सनीवन्तर्ध-भ्रस्ज-दम्भु-श्रि-स्वृ-यूर्णु-भर-ज्ञपि-सनाम्
7.2.50 क्लिशः क्त्वा-निष्ठयोः क्त्वानिष्ठयोः 54
7.2.51 पूङश्च
7.2.52 वसति-क्षुधोरिट् इट् 78
7.2.53 अञ्चेः पूजायाम्
7.2.54 लुभो विमोहने
7.2.55 जॄ-व्रश्च्योः क्त्वि क्त्वि 56
7.2.56 उदितो वा वा 57
7.2.57 सेऽसिचि कृत-चृत-च्छृद-तृद-नृतः
से 60
7.2.58 गमेरिट् परस्मैपदेषु परस्मैपदेषु 60
7.2.59 न वृद्भ्यश्चतुर्भ्यः न 65
7.2.60 तासि च क्लृपः
7.2.61 अचस्तास्वत् थल्यनिटो नित्यम्
तास्वत्, अनिटो नित्यम् 63; थलि 66
7.2.62 उपदेशेऽत्वतः
7.2.63 ऋतो भारद्वाजस्य
7.2.64 बभूथाततन्थ-जगृम्भ-ववर्थेति निगमे
7.2.65 विभाषा सृजि-दृशोः
7.2.66 इडत्त्यर्ति-व्ययतीनाम्
7.2.67 वस्वेकाजाद्-घसाम् वसु 69
7.2.68 विभाषा गम-हन-विद-विशाम्
7.2.69 सनिंससनिवांसम्
7.2.70 ऋद्धनोः स्ये
7.2.71 अञ्जेः सिचि सिचि 73
7.2.72 स्तु-सु-धूञ्भ्यः परस्मैपदेषु प..षु 73
7.2.73 यम-रम-नमातां सक् च
7.2.74 स्मि-पूङ्-रञ्ज्वशां सनि सनि 75
7.2.75 किरश्च पञ्चभ्यः पञ्चभ्यः 76
7.2.76 रुदादिभ्यः सार्वधातुके सार्वधातुके 81
7.2.77 ईशः से से 78
7.2.78 ईड-जनोर्ध्वे च

7.2.79 लिङः सलोपोऽनन्त्यस्य

7.2.80 अतो येयः अतः 82; इयः 81

7.2.81 आतो ङितः

7.2.82 आने मुक् आने 83

7.2.83 ईदासः

(विभक्तिकार्य-प्रकरणम्)

7.2.84 अष्टन आ विभक्तौ
आः 88; विभक्तौ 113

7.2.85 रायो हलि

7.2.86 युष्मदस्मदोरनादेशे
युष्मदस्मदोः 98; अनादेशे 89

7.2.87 द्वितीयायां च

7.2.88 प्रथमायाश्च द्विवचने भाषायाम्

7.2.89 योऽचि

7.2.90 शेषे लोपः

7.2.91 मपर्यन्तस्य 98

7.2.92 युवावौ द्विवचने

7.2.93 यूय-वयौ जसि

7.2.94 त्वाहौ सौ

7.2.95 तुभ्य-मह्यौ ङयि

7.2.96 तव-ममौ ङसि

7.2.97 त्व-मावेकवचने 98

7.2.98 प्रत्ययोत्तरपदयोश्च

7.2.99 त्रि-चतुरोः स्त्रियां तिसृ-चतसृ
तिसृचतसृ 100

7.2.100 अचि र ऋतः अचि 101

7.2.101 जराया जरसन्यतरस्याम्

7.2.102 त्यदादीनामः

(वा०) द्विपर्य्यन्तानामेवेष्टिः

7.2.103 किमः कः किमः 105

7.2.104 कु ति-होः

7.2.105 क्वाति

7.2.106 तदोः सः सावनन्त्ययोः सौ 108

7.2.107 अदस औ सुलोपश्च

7.2.108 इदमो मः इदमः 113; मः 109

7.2.109 दश्च

7.2.110 यः सौ सौ 111

7.2.111 इदोऽय् पुंसि इदः 113

7.2.112 अनाप्यकः अकः 113

7.2.113 हलि लोपः

(वृद्धि-प्रकरणम्)

7.2.114 मृजेर्वृद्धिः वृद्धिः 7.3.31

7.2.115 अचो ञ्णिति
अचः 7.3.31; ञ्णिति 7.3.35

7.2.116 अत उपधायाः

7.2.117 तद्धितेष्वचामादेः 7.3.31

7.2.118 किति च किति 7.3.31

॥ इति अष्टाध्यायीसूत्रपाठे सप्तमाध्यायस्य द्वितीयः पादः ॥

# अथ सप्तमाध्यायस्य तृतीयः पादः

7.3.1 देविका-शिंशपा-दित्यवाड्-दीर्घसत्र-श्रेयसामात्

7.3.2 केकय-मित्रयु-प्रलयानां यादेरियः

7.3.3 न य्वाभ्यां पदान्ताभ्याम् पूर्वौ तु ताभ्यामैच् न य्वाभ्याम्, पू..च् 5

7.3.4 द्वारादीनां च

7.3.5 न्यग्रोधस्य च केवलस्य

7.3.6 न कर्मव्यतिहारे न 9

7.3.7 स्वागतादीनां च

7.3.8 श्वादेरिञि श्वादेः 9

7.3.9 पदान्तस्यान्यतरस्याम्

7.3.10 उत्तरपदस्य 31

7.3.11 अवयवादृतोः

7.3.12 सु-सर्वार्धाज्जनपदस्य जनपदस्य 13

7.3.13 दिशोऽमद्राणाम् दिशः 14

7.3.14 प्राचां ग्राम-नगराणाम्

7.3.15 सङ्ख्यायाः संवत्सर-सङ्ख्यस्य च सङ्ख्यायाः 17

7.3.16 वर्षस्याभविष्यति

7.3.17 परिमाणान्तस्यासंज्ञा-शाणयोः

7.3.18 जे प्रोष्ठपदानाम्

7.3.19 हृद्-भग-सिन्ध्वन्ते पूर्वपदस्य च पूर्वपदस्य च 25

7.3.20 अनुशतिकादीनां च

7.3.21 देवताद्वन्द्वे च देवताद्वन्द्वे 23

7.3.22 नेन्द्रस्य परस्य न 23

7.3.23 दीर्घाच्च वरुणस्य

7.3.24 प्राचां नगरान्ते

7.3.25 जङ्गल-धेनु-वलजान्तस्य विभाषित-मुत्तरम्

7.3.26 अर्धात् परिमाणस्य पूर्वस्य तु वा अ..णस्य 27; पूर्वस्य 31; तु वा 30

7.3.27 नातः परस्य

7.3.28 प्रवाहणस्य ढे प्रवाहणस्य 29

7.3.29 तत्प्रत्ययस्य च

7.3.30 नञः शुचीश्वर-क्षेत्रज्ञ-कुशल-निपुणानाम् नञः 31

7.3.31 यथातथ-यथापुरयोः पर्यायेण

7.3.32 हनस्तोऽचिण्-णलोः

7.3.33 आतो युक् चिण्-कृतोः चिण्कृतोः 35

7.3.34 नोदात्तोपदेशस्य मान्तस्यानाचमेः न 35

7.3.35 जनि-वध्योश्च

**(आगम-प्रकरणम्)**

7.3.36 अर्त्ति-ह्री-ब्ली-री-क्नूयी-क्ष्माय्यातां पुङ् णौ णौ 43

7.3.37 शा-च्छा-सा-ह्वा-व्या-वे-पां युक्

7.3.38 वो विधूनने जुक्

7.3.39 लीलोर्नुग्लुकावन्यतरस्यां स्नेहविपातने

7.3.40 भियो हेतुभये षुक्

**(आदेश-प्रकरणम्)**

7.3.41 स्फायो वः

7.3.42 शदेरगतौ तः

7.3.43 रुहः पोऽन्यतरस्याम्

7.3.44 प्रत्ययस्थात् कात् पूर्वस्यात इदाप्यसुपः
प्रत्य..स्यातः, आप्यसुपः 49; इत् 48

7.3.45 न या-सयोः

7.3.46 उदीचामातः स्थाने य-कपूर्वायाः
उदीचाम् 48; आतः स्थाने 49

7.3.47 भस्त्रैषाजा-ज्ञा-द्वा-स्वा नञ्पूर्वाणामपि
नञ्पूर्वाणामपि 49

7.3.48 अभाषितपुंस्काच्च — अ..स्कात् 49

7.3.49 आदाचार्याणाम्

7.3.50 ठस्येकः — ठस्य 51

7.3.51 इसुसुक्-तान्तात् कः

7.3.52 च-जोः कु घिण्-ण्यतोः — चजोः कु 69

7.3.53 न्यङ्क्वादीनां च

7.3.54 हो हन्तेर्ञ्णिन्नेषु — हः 56; हन्तेः 55

7.3.55 अभ्यासाच्च — अभ्यासात् 58

7.3.56 हेरचङि

7.3.57 सन्-लिटोर्जेः — सन्लिटोः 58

7.3.58 विभाषा चेः

7.3.59 न क्वादेः — न 69

7.3.60 अजि-व्रज्योश्च

7.3.61 भुज-न्युब्जौ पाण्युपतापयोः

7.3.62 प्रयाजानुयाजौ यज्ञाङ्गे

7.3.63 वञ्चेर्गतौ

7.3.64 ओक उचः के

7.3.65 ण्य आवश्यके — ण्ये 69

7.3.66 यज-याच-रुच-प्रवचर्चश्च

(वा०) त्यजेश्च

7.3.67 वचोऽशब्दसंज्ञायाम्

7.3.68 प्रयोज्य-नियोज्यौ शक्यार्थे

7.3.69 भोज्यं भक्ष्ये

7.3.70 घोर्लोपो लेटि वा — लोपः 72

7.3.71 ओतः श्यनि

7.3.72 क्सस्याचि — क्सस्य 73

7.3.73 लुग्वा दुह-दिह-लिह-गुहामात्मनेपदे दन्त्ये

7.3.74 शमामष्टानां दीर्घः श्यनि — दीर्घः 76

7.3.75 ष्ठिवु-क्लमु-चमां शिति — शिति 82

7.3.76 क्रमः परस्मैपदेषु

7.3.77 इषु-गमि-यमां छः

7.3.78 पा-घ्रा-ध्मा-स्था-म्ना-दाण्-दृश्यर्ति-सर्ति-शद-सदां पिब-जिघ्र-धम-तिष्ठ-मन-यच्छ-पश्यर्च्छ-धौ-शीय-सीदाः

7.3.79 ज्ञा-जनोर्जा

7.3.80 प्वादीनां ह्रस्वः — ह्रस्वः 81

7.3.81 मीनातेर्निगमे

**(गुणादि-प्रकरणम्)**

7.3.82 मिदेर्गुणः — गुणः 88

7.3.83 जुसि च

7.3.84 सार्वधातुकार्धधातुकयोः — 86

7.3.85 जाग्रोऽवि-चिण्-णल्-ङित्सु

7.3.86 पुगन्त-लघूपधस्य च — लघूपधस्य 87

7.3.87 नाभ्यस्तस्याचि पिति सार्वधातुके
नाभ्यस्तस्य 89; पिति 94; सार्वधातुके 101

7.3.88 भू-सुवोस्तिङि

7.3.89 उतो वृद्धिर्लुकि हलि — वृद्धिः 90; हलि 100

7.3.90 ऊर्णोतेर्विभाषा — ऊर्णोतेः 91

7.3.91 गुणोऽपृक्ते

7.3.92 तृणह इम्

7.3.93 ब्रुव ईट् — ईट् 98

7.3.94 यङो वा — वा 95

7.3.95 तु-रु-स्तु-शम्यमः सार्वधातुके

7.3.96 अस्ति-सिचोऽपृक्ते — अस्तिसिचः 97; अपृक्ते 100

7.3.97 बहुलं छन्दसि

7.3.98 रुदश्च पञ्चभ्यः — रुदः, पञ्चभ्यः 99

7.3.99 अड् गार्ग्य-गालवयोः — अट् 100

7.3.100 अदः सर्वेषाम्

7.3.101 अतो दीर्घो यञि — अतः 104; दीर्घः यञि 102

7.3.102 सुपि च — सुपि 103

7.3.103 बहुवचने झल्येत् — एत् 106

7.3.104 ओसि च — ओसि 105

7.3.105 आङि चापः — आपः 106

7.3.106 सम्बुद्धौ च — सम्बुद्धौ 108

7.3.107 अम्बार्थ-नद्योर्ह्रस्वः

7.3.108 ह्रस्वस्य गुणः — ह्रस्वस्य 109; गुणः 111

7.3.109 जसि च

7.3.110 ऋतो ङि-सर्वनामस्थानयोः

7.3.111 घेर्ङिति — ङिति 115

7.3.112 आण् नद्याः

7.3.113 याडापः — आपः 114

7.3.114 सर्वनाम्नः स्याड्ढ्रस्वश्च — स्याट्, ह्रस्वः, च 115

7.3.115 विभाषा द्वितीया-तृतीयाभ्याम्

7.3.116 ङेराम् नद्याम्नीभ्यः — ङेः 119; आम् नद्याः 117

7.3.117 इदुद्भ्याम् — 119

7.3.118 औत् — 119

7.3.119 अच्च घेः — घेः 120

7.3.120 आङो नाऽस्त्रियाम्

॥ इति अष्टाध्यायीसूत्रपाठे सप्तमाध्यायस्य तृतीयः पादः ॥

## अथ सप्तमाध्यायस्य चतुर्थः पादः

7.4.1 णौ चङ्युपधाया ह्रस्वः — णौ..याः 8; ह्रस्वः 3

7.4.2 नाग्लोपि-शास्वृदिताम्

7.4.3 भ्राज-भास-भाष-दीप-जीव-मील-पीडामन्यतरस्याम्

7.4.4 लोपः पिबतेरीच्चाभ्यासस्य

7.4.5 तिष्ठतेरित्

7.4.6 जिघ्रतेर्वा — वा 7

7.4.7 उर्ऋत् — 8

7.4.8 नित्यं छन्दसि

7.4.9 दयतेर्दिगि लिटि — लिटि 12

7.4.10 ऋतश्च संयोगादेर्गुणः — गुणः 11

7.4.11 ऋच्छत्यृताम्

7.4.12 शॄ-दॄ-प्रां ह्रस्वो वा — ह्रस्वः 15

7.4.13 केऽणः अणः 14
7.4.14 न कपि 15
7.4.15 आपोऽन्यतरस्याम्
7.4.16 ऋ-दृशोऽङि गुणः अङि 20
7.4.17 अस्यतेस्थुक्
7.4.18 श्वयतेरः
7.4.19 पतः पुम्
7.4.20 वच उम्
7.4.21 शीङः सार्वधातुके गुणः शीङः 22
7.4.22 अयङ् यि क्ङिति यि 29; क्ङिति 25
7.4.23 उपसर्गाद्-ध्रस्व ऊहतेः उ..स्वः 24
7.4.24 एतेर्लिङि
7.4.25 अकृत्सार्वधातुकयोर्दीर्घः
अकृत्सार्वधातुकयोः 29; दीर्घः 26
7.4.26 च्वौ च च्वौ 27
7.4.27 रीङ् ऋतः ऋतः 30
7.4.28 रिङ् श-यग्-लिङ्क्षु यग्लिङ्क्षु 29
7.4.29 गुणोऽर्ति-संयोगाद्योः 30
7.4.30 यङि च यङि 31
7.4.31 ई घ्रा-ध्मोः ई 33
7.4.32 अस्य च्वौ अस्य 35
(वा०) अव्ययस्य च्वावीत्वं नेति वाच्यम्
7.4.33 क्यचि च क्यचि 39
7.4.34 अशनायोदन्य-धनाया बुभुक्षा-पिपासा-गर्धेषु
7.4.35 न च्छन्दस्यपुत्रस्य छन्दसि 39
7.4.36 दुरस्युर्द्रविणस्युर्वृषण्यति रिषण्यति
7.4.37 अश्वाघस्यात् आत् 38
7.4.38 देव-सुम्नयोर्यजुषि काठके
7.4.39 कव्यध्वर-पृतनस्यर्चि लोपः
7.4.40 द्यति-स्यति-मा-स्थामित् ति किति
इत् 41; ति किति 47
7.4.41 शा-च्छोरन्यतरस्याम्
7.4.42 दधातेर्हिः हिः 44
7.4.43 जहातेश्च क्त्वि जहातेः, क्त्वि 44
7.4.44 विभाषा छन्दसि छन्दसि 45
7.4.45 सुधित वसुधित नेमधित धिष्व धिषीय च
7.4.46 दो दद् घोः दः, घोः 47
7.4.47 अच उपसर्गात् तः तः 49
7.4.48 अपो भि
7.4.49 सः स्यार्धधातुके सः 52; सि 57
7.4.50 तासस्त्योर्लोपः तासस्त्योः 52; लोपः 53
7.4.51 रि च
7.4.52 ह एति
7.4.53 यीवर्णयोर्दीधी-वेव्योः
7.4.54 सनि मी-मा-घु-रभ-लभ-शक-पत-पदामच इस् सनि 57; अचः 56
7.4.55 आप्-ज्ञप्यृधामीत् ईत् 56
7.4.56 दम्भ इच्च
7.4.57 मुचोऽकर्मकस्य गुणो वा

## (अभ्यास-प्रकरणम्)

7.4.58 अत्र लोपोऽभ्यासस्य अभ्यासस्य 97
7.4.59 ह्रस्वः
7.4.60 हलादिः शेषः शेषः 61
7.4.61 शर्पूर्वाः खयः
7.4.62 कु-होश्चुः चुः 64
7.4.63 न कवतेर्यङि न, यङि 64
7.4.64 कृषेश्छन्दसि छन्दसि 65

7.4.65 दाधर्ति दर्धर्ति दर्धर्षि बोभूतु तेतिक्तेऽलर्ष्यापनीफणत् संसनिष्यदत् करिक्रत् कनिक्रदद् भरिभ्रद् दविध्वतो दविद्युतत् तरित्रतः सरीसृपतं वरीवृजन् मर्मृज्यागनीगन्तीति च

7.4.66 उरत्

7.4.67 द्युति-स्वाप्योः संप्रसारणम् स..म् 68

7.4.68 व्यथो लिटि लिटि 74

7.4.69 दीर्घ इणः किति दीर्घः 70

7.4.70 अत आदेः

7.4.71 तस्मान्नुड् द्विहलः तस्मात्, नुट् 72

7.4.72 अश्नोतेश्च

7.4.73 भवतेरः अः 74

7.4.74 ससूवेति निगमे

7.4.75 निजां त्रयाणां गुणः श्लौ त्रयाणाम् 76; श्लौ 78

7.4.76 भृञामित् इत् 81

7.4.77 अर्ति-पिपर्त्योश्च

7.4.78 बहुलं छन्दसि

7.4.79 सन्यतः सनि 81

7.4.80 ओः पु-यण्-ज्यपरे 81

7.4.81 स्रवति-शृणोति-द्रवति-प्रवति-प्लवति-च्यवतीनां वा

7.4.82 गुणो यङ्-लुकोः यङ्लुकोः 90

7.4.83 दीर्घोऽकितः

7.4.84 नीग् वञ्चु-स्रंसु-ध्वंसु-भ्रंसु-कस-पत-पद-स्कन्दाम्

7.4.85 नुगतोऽनुनासिकान्तस्य नुक् 87

(वा०) पदान्ताच्चेति वक्तव्यम्

7.4.86 जप-जभ-दह-दश-भञ्ज-पशां च

7.4.87 चर-फलोश्च चरफलोः 89

7.4.88 उत् परस्यातः उत्, अतः 89

7.4.89 ति च

7.4.90 रीगृदुपधस्य च रीक् 92; ऋदुपधस्य 91

(वा०) रीगृत्वत इति वक्तव्यम्

7.4.91 रुग्रिकौ च लुकि रुग्रिकौ, लुकि 92

7.4.92 ऋतश्च

7.4.93 सन्वल्लघुनि चङ्परेऽनग्लोपे लघुनि, अनग्लोपे 94; चङ्परे 97

7.4.94 दीर्घो लघोः

7.4.95 अत् स्मृ-दृ-त्वर-प्रथ-म्रद-स्तृ-स्पशाम् अत् 97

7.4.96 विभाषा वेष्टि-चेष्ट्योः

7.4.97 ई च गणः

॥ इति अष्टाध्यायीसूत्रपाठे सप्तमाध्यायस्य चतुर्थः पादः ॥

॥ इति अष्टाध्यायीसूत्रपाठे सप्तमोऽध्यायः ॥

# अथाष्टमोऽध्यायः

## अथ प्रथमः पादः

(द्विरुक्ति-प्रकरणम्)

8.1.1 सर्वस्य द्वे 15

8.1.2 तस्य परमाम्रेडितम् आम्रेडितम् 3

8.1.3 अनुदात्तं च

8.1.4 नित्य-वीप्सयोः

8.1.5 परेर्वर्जने

8.1.6 प्र-समुपोदः पादपूरणे

8.1.7 उपर्यध्यधसः सामीप्ये

8.1.8 वाक्यादेरामन्त्रितस्यासूया-सम्मति-कोप-कुत्सन-भर्त्सनेषु

8.1.9 एकं बहुव्रीहिवत् बहुव्रीहिवत् 10

8.1.10 आबाधे च

8.1.11 कर्मधारयवदुत्तरेषु कर्मधारयवत् 15

8.1.12 प्रकारे गुणवचनस्य

(वा०) डाचि विवक्षिते द्वे बहलम्

(वा०) कर्मव्यतिहारे सर्वनाम्नो द्वे वाच्ये समासवच्च बहुलम्

(वा०) स्त्री-नपुंसकयोरुत्तरपदस्य चाम्भावो वक्तव्यः

8.1.13 अकृच्छ्रे प्रिय-सुखयोरन्यतरस्याम्

8.1.14 यथास्वे यथायथम्

8.1.15 द्वन्द्वं रहस्य-मर्यादावचन-व्युत्क्रमण-यज्ञपात्रप्रयोगाभिव्यक्तिषु

(पदाधिकारः)

8.1.16 पदस्य 8.3.54

8.1.17 पदात् 68

(अनुदात्त-प्रकरणम्)

8.1.18 अनुदात्तं सर्वमपादादौ 74

8.1.19 आमन्त्रितस्य च

8.1.20 युष्मदस्मदोः षष्ठी-चतुर्थी-द्वितीयास्थयो-र्वान्नावौ युष्मदस्मदोः 26; ष..स्थयोः 22

(वा०) एकवाक्ये युश्मदस्मदादेशा वक्तव्याः

(वा०) एते वान्नावादयोऽनन्वादेशे वा वक्तव्याः

8.1.21 बहुवचनस्य वस्-नसौ

8.1.22 ते-मयावेकवचनस्य एकवचनस्य 23

8.1.23 त्वा-मौ द्वितीयायाः

8.1.24 न च-वा-हाहैवयुक्ते न 26

8.1.25 पश्यार्थैश्चानालोचने

8.1.26 सपूर्वायाः प्रथमाया विभाषा

8.1.27 तिङो गोत्रादीनि कुत्सनाभीक्ष्ण्ययोः

8.1.28 तिङ्ङतिङः तिङ् 66

8.1.29 न लुट् न 66

8.1.30 निपातैर्यद्-यदि-हन्त-कुविन्-नेच्-चेच्-चण्-कच्चिद्-यत्रयुक्तम्

8.1.31 नह प्रत्यारम्भे

8.1.32 सत्यं प्रश्ने

8.1.33 अङ्गाप्रातिलोम्ये अप्रातिलोम्ये 64

8.1.34 हि च हि 35

8.1.35 छन्दस्यनेकमपि साकाङ्क्षम्

8.1.36 यावद्-यथाभ्याम् 38

8.1.37 पूजायां नानन्तरम् 38

8.1.38 उपसर्गव्यपेतं च

8.1.39 तु-पश्य-पश्यताहैः पूजायाम् पूजायाम् 40

8.1.40 अहो च अहो 41

8.1.41 शेषे विभाषा विभाषा 42

8.1.42 पुरा च परीप्सायाम्

8.1.43 नन्वित्यनुज्ञैषणायाम्

8.1.44 किं क्रियाप्रश्नेऽनुपसर्गमप्रतिषिद्धम् 45

8.1.45 लोपे विभाषा

8.1.46 एहि-मन्ये प्रहासे लृट्

8.1.47 जात्वपूर्वम् अपूर्वम् 49

8.1.48 किंवृत्तं च चिदुत्तरम्

